ISSN 2230-8962

# वेदविद्या
# VEDAVIDYĀ

अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता, प्रवरसमीक्षिता च शोध-पत्रिका
Internationally Recognized Refereed & Peer-reviewed Research Journal

विश्वविद्यालयानुदानायोगस्य 'केयर' सूच्यां भारतीयभाषाविभागे क्रमसंख्या - 97
Indexed in UGC 'CARE' list; Indian Language Sl. No. - 97

अङ्क : 34
Vol. XXXIV

जुलाई - दिसम्बर 2019
July - December 2019

सम्पादकः
**प्रो.विरूपाक्ष वि. जड्डीपाल्**




**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् उज्जयिनी**
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकारस्याधीनम्)

ISSN 2230-8962

# वेदविद्या

# VEDA-VIDYĀ

अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता, प्रवरसमीक्षिता च शोध-पत्रिका
Internationally Recognized Refereed & Peer-reviewed Research Journal
विश्वविद्यालयानुदानायोगस्य 'केयर' सूच्यां भारतीयभाषाविभागे क्रमसंख्या - ९७
Indexed in UGC 'CARE' list; Indian Language Sl. No. - 97

अङ्क : ३४ जुलाई-दिसम्बर २०१९
Vol. XXXIV July-December 2019

सम्पादकः
**प्रो. विरूपाक्ष वि. जड्डीपाल्**
सचिवः

**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्**
(भारतसर्वकार-मानवसंसाधनविकासमन्त्रालयाधीनम्)
वेदविद्यामार्गः, चिन्तामणगणेशः, पो. जवासिया, उज्जैनः ४५६००६

**मुख्य-संरक्षक**
**डॉ. रमेशपोखरियाल 'निशंक'**
(अध्यक्ष, महर्षि सान्दीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान, तथा
मानव संसाधन विकास मन्त्री, भारतसर्वकार)

**संरक्षक**
**प्रो. देवीप्रसादत्रिपाठी**
उपाध्यक्ष, महर्षि सान्दीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान

**सम्पादक**
**प्रो. विरूपाक्ष वि. जड्डीपाल्**
सचिव, महर्षि सान्दीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान

**अक्षरसंयोजिका**
**सौ. मितालीरत्नपारखी**

**मूल्य**
वार्षिक शुल्क २००/-

**पत्राचार-सङ्केत**
**महर्षि सान्दीपनि राष्ट्रिय वेदविद्या प्रतिष्ठानम्**
वेदविद्या मार्ग, चिन्तामण गणेश,
पो. जवासिया, उज्जैन 456006
दूरभाष : (0734) 2502266, 2502254
तथा फैक्स : (0734) 2502253
e-mail : msrvvpujn@gmail.com,
Website : msrvvp.ac.in

**समीक्षा समिति**
**प्रो. श्रीपाद सत्यनारायण मूर्ति**
सेवानिवृत्त प्रोफेसर (व्याकरण), राष्ट्रीय संस्कृत विद्यापीठ, तिरुपति

**प्रो. प्रफुल्ल कुमार मिश्र**
पूर्व निदेशक, राष्ट्रीय पाण्डुलिपि मिशन, नई दिल्ली; एवं सेवानिवृत्त प्रोफेसर (संस्कृत),
उत्कल विश्वविद्यालय, भुवनेश्वर, ओडिशा

**प्रो. ईश्वर भट्ट**
प्रोफेसर (ज्योतिष), राष्ट्रीय संस्कृत संस्थान, नई दिल्ली

**सम्पादक मण्डल**
**प्रो. विरूपाक्ष वि. जड्डीपाल्**
सचिव, महर्षि सान्दीपनि राष्ट्रीय वेदविद्या प्रतिष्ठान, उज्जैन

**प्रो. केदारनारायण जोशी**
सेवानिवृत्त प्रोफेसर (संस्कृत), विक्रम विश्वविद्यालय, उज्जैन

**आचार्य (डॉ.) सदानन्द त्रिपाठी**
शासकीय संस्कृत महाविद्यालय, उज्जैन

**आचार्य श्री श्रीधर अडि**
अथर्ववेद के मूर्धन्य विद्वान् एवं प्रख्यात वेदपाठी, गोकर्ण

**डॉ. दयाशंकर तिवारी**
एसोसिएट प्रोफेसर (संस्कृत), दिल्ली विश्वविद्यालय, दिल्ली

**डॉ. अनूप कुमार मिश्र**
डीडीओ, महर्षि सान्दीपनि राष्ट्रीय वेदविद्या प्रतिष्ठान, उज्जैन

**सूचना -** अत्र शोधनिबन्धेषु प्रकाशिताः सर्वेऽपि अभिप्रायाः तत्तन्निबन्धप्रणेतृणामेव, ते अभिप्रायाः न प्रतिष्ठानस्य, न वा भारतसर्वकारस्य।

# विषयानुक्रमणिका


| क्र. | | पृष्ठ |
|---|---|---|
| | **सम्पादकीयम्** | i-vi |
| **संस्कृत-सम्भागः** | | |
| १. | **वेदाध्ययनविमर्शः**<br>- डॉ. शैलेन्द्रप्रसाद् उनियालः | १-१० |
| २. | **आचार्यमध्वदृष्ट्या वेदानां महत्त्वम्**<br>- डॉ. नारायणः | ११-१८ |
| ३. | **ऋग्वेदे वैदिकयज्ञानां प्रासङ्गिकता**<br>- डॉ. गणेशप्रसादभट्टः | १९-२२ |
| ४. | **षड्विंशब्राह्मणानुसारम् अलौकिकविज्ञानम्**<br>- डॉ. रामराज उपाध्यायः | २३-२७ |
| ५. | **ज्योतिषोक्तकालोपाधीनां वेदमूलत्वम्**<br>- डॉ. सुरेशशर्मा | २८-३४ |
| ६. | **वैदिकवाङ्मये वास्तुविद्यासमीक्षा**<br>- डॉ. अशोकथपलियालः | ३५-४२ |
| ७. | **आधुनिककाले वेदविहितकर्मानुष्ठानस्य प्रासङ्गिकता**<br>- विरूपाक्षकौण्डिन्यशर्मा | ४३-४५ |
| ८. | **आधुनिकसामाजिकन्यायस्य अवधारणा : चिन्तनस्य दृष्टिः**<br>- डॉ. अजयकुमारमिश्रः | ४६-५० |
| ९. | **अथर्ववेदस्य पैप्पलादसंहिता - एकं विहङ्गावलोकनम्**<br>- डॉ. सोमनाथदाशः | ५१-६४ |
| १०. | **प्राचीनभारतीयविद्याकेन्द्राणि, विश्वगुरुः भारतवर्षं च**<br>- विरूपाक्ष वि. जड्डीपाल् | ६५-७७ |
| **हिन्दी-सम्भाग** | | |
| ११. | **वेद में योग विद्या**<br>- डॉ. कुञ्जदेव मनीषी | ७८-८१ |

१२. **वैदिक संहिता के अनुसार अग्नि विषयक वैज्ञानिक तथ्य का विवेचन** **८२-९०**
- डॉ. चन्दा कुमारी

१३. **वेदों में वर्णित सूर्यकिरण चिकित्सा** **९१-९६**
- प्रो. सुमन मिश्र

१४. **वेदों में विश्वशान्ति का सन्देश** **९७-१०४**
- डॉ. कमलाकान्त मिश्र

१५. **प्राणो रक्षति रक्षितः** **१०५-११५**
- चेतना वेदी

## English Section

**16.** **The Kālasūkta of the Atharvaveda: An Appraisal** **116-120**
- Dr. Upama Barman Deka

**17.** **The States of Consciousness in Māṇḍūkya - Upaniṣad : A Critical Analysis** **121-137**
- Dr. Kapil Gautam

# सम्पादकीयम्

1987 ईसवीय-वर्षस्य जनवरीमासे 1860 सोसाइटी-पञ्जीकरणाधिनियमान्तर्गततया राष्ट्रियवेदविद्याप्रतिष्ठानस्य स्थापनां भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयीयोच्च-शिक्षाविभागः स्वायत्तशासिसंस्थारूपेण नवदेहल्याम् अकरोत्। तदनु भगवतः श्रीकृष्णस्य गुरोः वेदविद्याशास्त्रकलावारिधेः महर्षेः सान्दीपनेः विद्यागुरुकुलधाम्नि उज्जयिनीनाम्नि नगरे 1993 वर्षे स्थानान्तरितं प्रतिष्ठानं महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानमिति नाम्ना विश्वेऽस्मिन् भारत-केन्द्रसर्वकारस्य वेदशिक्षणनीतेः मुखत्वेन विराजते।

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानं महासभायाः, शासिपरिषदः, वित्तसमितेः च प्राधिकारेण, अनुदानसमितेः, परियोजनासमितेः, परीक्षासमितेः, शिक्षासमितेः च मार्गदर्शने तानि तानि उद्दिष्टानि कार्याणि साधयति। भारतसर्वकारस्य माननीयाः शिक्षामन्त्रिणः योजनानिर्णेत्र्याः महासभायाः सभापतयः, कार्यकारिण्याः शासिपरिषदश्च अध्यक्षाः विद्यन्ते। माननीयाः मनोनीताः उपाध्याक्षाः वित्तसमितेः, अनुदानसमितेः, परियोजनासमितेः च अध्यक्षाः विलसन्ति। शिक्षामन्त्रालयस्य प्रशासनदक्षाः अधिकारिणः सर्वे प्रतिष्ठानस्य साहाय्यम् आचरन्ति इति श्रुतिपरम्परा-रक्षण-विकास-संवर्धन-निष्ठानां नः अहो भाग्यम्।

अस्य प्रतिष्ठानस्य स्थापनायाः द्वादश उद्देश्यानि वर्तन्ते । तानि यथा -

1. वेदाध्ययनस्य श्रुतिपरम्परायाः संरक्षणं, संवर्धनं, विकासश्च वर्तते। एतदर्थं प्रतिष्ठानं नाना-क्रियाकलापान् आयोजयेत्। उद्दिष्टाः ते क्रियाकलापाः सन्ति-पारम्परिकाणां वेदसंस्थानानां वेदपाठिनां, विदुषां च कृते साहाय्याचरणम्, अध्येतृवृत्त्यादिप्रदानं दृश्यश्रव्याभिलेखव्यवस्था च इत्यादयः।
2. वेदपाठिनां, वेदपण्डितानां, वेदविदुषां, वटूनां च निरन्तरं वेदाध्ययनेन वेदस्वरपरम्परायाः सस्वरवेदपाठपरम्परायाश्च सततं संवर्धनम्।
3. कृतवेदाध्ययनानां बद्धश्रद्धानां वेदविद्यार्थिनां प्रवृत्तये वेदविषयकोच्चतरशोधकार्ये प्रोत्साहनं, तादृशानां वेदविद्यार्थिनां शोधकार्यप्रवृत्तेः सुनिश्चयतासम्पादनं च ।
4. वेदार्थज्ञानवतां विद्यार्थिनां वेदेषु शोधकार्याय सर्वसौविध्यप्रदानम्, वैज्ञानिकदृष्टेः विश्लेषणात्मकदृष्टेः च व्युत्पादनं, येन वेदेषु निहितम् आधुनिकं वैज्ञानिकं ज्ञानं यथा-गणितम्, खगोलशास्त्रम्, ऋतुविज्ञानम्, रसायनशास्त्रम्, द्रवगतिविज्ञानम् चेत्यादि यदस्ति-तत् आधुनिकविज्ञानेन प्रौद्योगिक्या च सह सम्बद्ध्येत येन वेदविदुषां वेद-पण्डितानां च आधुनिकविद्वद्भिः सह विद्या-सम्बन्धस्य स्थापनं भवेत्।

5. सर्वत्र भारते वेदपाठशालानाम् / अनुसन्धानकेन्द्राणां संस्थापनं, अधिग्रहणम्, प्रबन्धनम्, पर्यवेक्षणं वा सोसाइटी-उद्देश्यमनु तेषां सञ्चालनं, प्रबन्धनं वा भवेत् ।
6. असम्यक्-सञ्चालितानां, नाशप्रायणां वा मूलनिधीनां न्यासानां च पुनः उज्जीवनं सम्यक्-प्रशासनं च।
7. विलुप्तप्रायाणां वेदशाखानां पुनः उज्जीवनं विशिष्टं लक्ष्यम्, तथा तासां वेदशाखानां पुनः उज्जीवनाय मानवकोषाणाम् (वेदविदुषां वेदपण्डितानां वटूनां वा) अभिज्ञानं तथा तासां-विलुप्तप्रायाणां वेदशाखानां विषयेनिपुणानां वेदपण्डितानां नाम्नां विस्तृतसूचीनिर्माणम्।
8. भारते विद्यमानानां नानाप्रदेशानां, संस्थानानां, मठानां च विशिष्टायाः वेदस्वर-परम्परायाः, वेदाध्ययनस्य श्रुतिपरम्परायाः, सस्वरपाठपरम्परायाः चअद्यतन-स्थितेः निर्धारणम्।
9. नानावेदशाखानां श्रुतिपरम्परायाः ग्रन्थसामग्रीणां, मुद्रितानां ग्रन्थानां, पाण्डुलिपीनां, ग्रन्थानां, भाष्याणां, व्याख्यानानां च विषये सूचनानां सङ्ग्रहणम्।
10. भारते वेदाध्ययनस्य वेदस्वरपरम्परायाः सस्वरवेदपाठपरम्परायाः चदृश्यश्रव्याभि-लेखनस्य अद्यतनस्थितेः विषये सूचनानां संग्रहणम् ।
11. वेदावधेः सर्वाद्यकालतः अद्य यावत् वेदेषु वेदवाङ्मये च निहितस्य ज्ञानस्य, विज्ञानस्य, कृषेः, प्रौद्योगिक्याः, दर्शनस्य, भाषाविज्ञानस्य, वेदपरम्परायाः च समुन्नतये अनुसन्धानस्य प्रवर्तनम्, तथा ग्रन्थालयस्य, अनुसन्धानोपकरणस्य, अनुसन्धानसौविध्यस्य, साहाय्य-कारिकर्मचारिणां, प्रविध्यभिज्ञायाः मानवशक्तेः च प्रदानम्।
12. सोसाइटी-स्मरणिकाम् अनुसृत्य प्रतिष्ठानस्य सर्वेषाम् अथवा केषाञ्चन उद्देश्यानां पूर्तये आवश्यकानां, सर्वेषाम् अथवा केषांचनसाहाय्यानाम्, आनुषङ्गिकाणां, प्रासङ्गिकानांवा कार्यकलापानां निर्वहणम् इति।

एतेषाम् उद्देश्यानां सम्पूर्तये स्थापनामनु काले काले नानाकार्यकलापान् प्रतिष्ठानम् अन्वतिष्ठत्, अनुतिष्ठति च। तस्मादेव वेदस्वरपरम्परायाः सस्वरवेदपाठपरम्परायाः च सततं संवर्धनार्थं भारतस्य षड्विंशत्यां राज्येषु विद्यमानानां शतशः वेदपाठशालानां वेदगुरुशिष्यपरम्पराणां च वित्तानुदानम्, वर्धिष्णूनां सहस्रशः वेदवटूनां भोजनावासाद्यर्थं छात्रवृत्तिप्रदानं, नानावेदसम्मेलनानां नानावेदसंगोष्ठीनां च निर्वहणम्, आहिताग्नीनां, वयोवृद्धवेदपाठिनां साहाय्यम्, विलुप्तप्रायायाः ऋग्वेदशाङ्खायनशाखायाः पुनः उज्जीवनम्,

नानावेदशाखा-ग्रन्थानां, अनुसन्धानोपकरणानां, अनुसन्धानात्मकग्रन्थानां च मुद्रणम्, सस्वरवेदपाठ-परम्परायाः दृश्यश्रव्याभिलेखनं, वैदिकग्रन्थालयस्य स्थापनम्, आदर्शवेद-विद्यालयस्य स्थापनम् इत्यादीनि कार्याणि 33 वर्षेषु प्रतिष्ठानम् अन्वतिष्ठत्।

यज्ञसामग्रीप्रदर्शनी, वेदविज्ञानप्रदर्शनी, वेदप्रशिक्षणकेन्द्रम्, वेदानुसन्धानकेन्द्रम्, एतदङ्गतया वेदपाण्डुलिपिग्रन्थालयः इत्यादीनि कार्याणि सम्प्रति प्रतिष्ठानस्य प्राधिकारिसमित्या अनुमतानि सन्ति।

बद्धश्रद्धानां वेदविद्यार्थिनां वेदविषयकोच्चतरशोधकार्ये प्रोत्साहनं, वेदशोधकार्य-प्रवृत्तेः सुनिश्चितततासम्पादनं, वेदविद्यार्थिषुवैज्ञानिकदृष्टेः विश्लेषणात्मकदृष्टेः च व्युत्पादनेनवेदेषु निहितस्य वैज्ञानिकज्ञानशेवधेः यथा-पर्यावरणविज्ञानस्य, जलवायु-परिवर्तनविज्ञानस्य, गणितस्य, खगोलशास्त्रस्य, ऋतुविज्ञानस्य, रसायनशास्त्रस्य, द्रवगतिविज्ञानस्य च आधुनिकविज्ञानेन प्रौद्योगिक्या च सह सम्यक् सम्बन्धेन आधुनिकानां नवीनानां च नानाज्ञानशाखानां संवर्धनं स्यादिति प्रतिष्ठानं भावयति।

अत एव वेदेषु निहितस्य ज्ञानविज्ञानशेवधेः सर्वत्र प्रकाशनाय प्रसाराय च षाण्मासिक्याः "वेदविद्या"-नाम्न्याः महितायाः अनुसन्धानपत्रिकायाः प्रकाशनं प्रतिष्ठानं कुरुते। तत्र वेदपण्डितानां, वेदपाठिनां वेदशोधकार्यप्रवृत्तानां मूर्धन्यानां मनीषिणां-विदुषीणां च प्रतिभाकुञ्जप्रसूतान् नानाशोधलेखान् प्रकाशयति प्रतिष्ठानं, वेदज्ञानं वितरति, आधुनिकविद्वद्भिः सह सारस्वतं सम्बन्धं च स्थापयति।

तत्र क्रमे वेदविद्यायाः चतुस्त्रिंशः (34) अङ्कः एषः भवतां हस्तमुपगतः इति प्रसन्नं चेतः। अत्र हि वेदविद्यायाः संस्कृत-सम्भागे, 'वेदाध्ययनविमर्शः' इति डॉ. शैलेन्द्रप्रसाद उनियालमहोदयः लेखे वेदम् अध्येतुकामेन पालनीयान् शास्त्रनियमान् उपस्थापयति। वेदारम्भे आदौ बाह्यविषयेभ्यो मनः विनिवृत्य एकाग्रमनसा प्रसन्नचेतसा च वेदाध्ययनं प्रारभेत। आदौ गुरोः पादग्रहणं, ततः हरिः ओम् इत्युच्चार्य ततः पश्चात् गायत्र्युच्चारणं, ततो वेदाध्ययनं श्रवणपरम्परया, न तु पुस्तकदर्शनेन इति क्रमेण 'वेदाध्ययनविमर्शं' डॉ. शैलेन्द्रप्रसाद उनियालः निरदर्शयत्। 'आचार्यमध्वदृष्ट्या वेदानां महत्त्वम् इति लेखे डॉ. नारायणमहोदयाः वेदविषये, वेदानां प्रतिपाद्यविषये, "सर्वे ते च सदागमाः" "नावेदविन्मनुते तं बृहन्तम्" इत्यादिप्रमाणोल्लेखपुरस्सरं श्रीमन्मध्वाचार्याणां भाष्यविषये चिन्तनं सुष्ठु निदर्शयन्ति। 'ऋग्वेदे वैदिकयज्ञानां प्रासङ्गिकता' इति लेखे डॉ. गणेशप्रसादभट्टमहोदयाः यज्ञेन रोगप्रशमनं भवति, आयुः वर्धते, अन्तः करणशुद्धिश्च भवति इति सप्रमाणं प्रतिपादयन्ति। 'षड्विंशब्राह्मणानुसारम् अलौकिक-विज्ञानम्' इति

लेखे विविधमन्त्राणां प्रयोगविज्ञानं, प्रयोगजानि लौकिकफलान्यधिकृत्य विवृत्य प्रकाशयति डॉ. रामराज उपाध्यायः । "ज्योतिषोक्त-कालोपाधीनां वेदमूलकत्वम्" इति लेखे डॉ. सुरेशशर्मा कल्प-युग-संवत्सर-वर्ष-अयन-मास-पक्ष-दिनादीनाम् आधारो वेद इति वेदप्रमाणपुरस्सरं प्रत्यपादयत्। "वैदिकवाङ्मये वास्तुविद्यासमीक्षा" इति लेखे डॉ. अशोकथपलियालः वास्तुशब्द-प्रयोगपरिशीलनपुरस्सरं वेदवाङ्मये उपलब्धस्य वास्तुविद्याचिन्तनं सुमनोहरं विशदयति। "आधुनिककाले वेदविहित-कर्मानुष्ठानस्यावश्यकता" इति लेखे पण्डित-श्रीविरूपाक्षकौण्डिन्यशर्ममहोदयाः स्मृत्यादि-नानावाङ्मयतः भूरीणि प्रमाणानि उद्धृत्य अस्मिन् काले वेदविहितकर्मानुष्ठानस्य फलम् आवश्यकतां च निदर्शयन्ति। डॉ. अजयकुमारमिश्रः "आधुनिकसामाजिक-न्यायस्यावधारणा" इति लेखे त्रैकालिक-सत्यदृशां वैदिकऋषीणां सामाजिक-न्यायावधारणां प्रमाणपुरस्सरं सुविचिन्त्य विशदयति। अथर्ववेद-पैप्पलादशाखाया विहङ्गवीक्षणम् इति लेखे डॉ. सोमनाथदाशः अतीव विशदतया अथर्ववेद-पैप्पलादशाखाया विषयगतं वैशिष्ट्यं सुविस्तरं चिन्तयति। भारतवर्षं प्राचीनकालतः एव विविधविद्यानां प्राचीनतमं केन्द्रं विश्वगुरुरपि चासीदिति सर्वदा वयं सर्वे कथयामः। तदेतत्कथनस्य प्रामाण्यसंपुष्ट्ये विविधेभ्यः स्रोतोभ्यः प्रमाणान्यन्विष्य "प्राचीनभारतीय-विद्याकेन्द्राणि, विश्वगुरुः भारतवर्षं च" इति शीर्षकयुक्तं लेखम् अलिखम्। एतेन भारतस्य विविधविद्याकेन्द्रत्वं विश्वगुरुत्वभावना च द्रढीकृता भवेत्, भारतीयविद्याव्यापृतिश्च ज्ञाता भवति, आधुनिककाले महती सत्प्रेरणा च भवेत् इति भावये।

ततश्च हिन्दी-विभागे, "वेद में योगविद्या" इति लेखे कुञ्जदेवमनीषीमहोदया वेदेषु बीजरूपेण उपलभ्धं योगविद्याविवेचनं विशदयति। "वैदिक संहिता के अनुसार अग्नि विषयक वौज्ञानिक तथ्य का विवेचन" नामके लेखे डॉ. चन्दा कुमारी अग्नेः वैदिकं लौकिकं च स्वरूपं विवृत्य अग्नेः विविधशक्तीः वैज्ञानिकस्वरूपविवरणपुरस्सरं प्रकाशति। "वेदों में वर्णित सूर्य चिकित्सा" इति लेखे प्रो. सुमनमिश्रमहोदयः वेदेक्ताः आथर्वणी-आङ्गिरसी-दैवी-मनुष्यजा-चिकित्साः उल्लिख्य प्रातः कालिकैः सौवर्णैः सूर्यकिरणैस्स्वास्थ्यलाभम् आयुर्वेद-दृष्ट्या प्रमाणयति। "वेदों में विश्वशान्ति का सन्देश" इति लेखे डॉ. कमलाकान्तमिश्र-महोदयः वेदेषु ऋषिभिः दृष्टानि मूल्यपराणि अनुपमानि नाना चिन्तनरत्नानि उद्घाट्य कल्याणमयीं वेदवाणीं वैश्विकशान्तिसमवक्षये संस्तौति। "प्राणो रक्षति रक्षितः" इति लेखे सुश्री चेतनावेदी वैदिकवाङ्मयमालेड्य आरण्यकानि परिशील्य वेदोक्तमार्गेण प्राणोपासनया एव आत्मदर्शनरूपं सिद्ध्यति इति प्रतिपादयति।

ततः परम् आङ्ग्ल-भागे, 'The Kālasūkta of the Atharvaveda: An Appraisal' इतिलेखे डॉ. उपमन्युडेकमहोदया, सर्वतोभावेन, अथर्ववेदीयं कालसूक्तम् अर्थानुसन्धानपुरस्सरं विश्लष्य च निदर्शयति। 'The States of Consciousness in Māṇḍūkya-Upaniṣad : A Critical Analysis" इति लेखं डॉ. कपिलगौतमः जगृत-स्वप्न-सुषुप्ति-तुरीयावस्थाः माण्डूक्योपनिषदुत्प्रतिपादिताः नानावाक्यविश्लेषणपुरस्सरं समदृभत् ।

एतेषां लेखानाम् अध्ययनेन, परिशीलनेन, सम्पादनेन इदं स्पष्टं भवति यदिमे वेदादिविषयनिपुणानां अनुसन्धानतत्त्वभूयिष्ठा निबन्धाः वेदात् प्रवर्तितां ज्ञानविज्ञान-चिन्तनपरम्परां प्रकाशयन्ति सम्यक्, विस्तारयन्ति, आधुनिकज्ञानेन च वेदान्तर्निहितं ज्ञानं संयोजयन्ति। इमे लेखाः सामान्यजनमानसं प्रति वेदार्थान् विदुषां चिन्तनानि च नयन्ति, लोकानां च कृते वेदे निहितं ज्ञानराशिं निदर्शयन्ति। ईदृशान् अनुसन्धानपरान् लेखान् श्रद्धया विरचय्य प्रकाशनाय प्रहितवतः विदुषः एतान् सर्वान् अभिनन्दामि। भविष्यति काले लेखान् विरचय्य प्रेषयन्तु, अन्यान् शिष्यप्रशिष्यान् च प्रेरयन्तु भवन्त इति च प्रार्थना।

एतेषाम् अनुसन्धानलेखानां परिशीलने, शोधपत्रसंस्कारे, सम्पादने च सम्पादन-मण्डलस्य विद्वत्परामर्शकाणां विदुषां भूयो भूयः साहाय्यं काले काले संप्राप्तम् अस्ति। अतः तेभ्यः सर्वेभ्यः महानुभावेभ्यः हार्दान् धन्यवादान् वितनोमि।

एतेषाम् अनुसन्धानलेखानां मुद्राक्षरयोजने, मुद्रणसंस्कारे, ग्रन्थकलेवरनिर्माणे च साहाय्यं कृतवतः सर्वान् मम साहाय्यान् प्रति उत्साहवर्धकान् धन्यवादान् वितनोमि।

दिनांक - 30.12.2019

**प्रो. विरूपाक्ष वि. जड्डीपाल्**

सचिवः

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,

(मानवसंसाधनविकासमन्त्रालयः, भारतसरकारः)

वेदविद्यामार्गः, चिन्तामणगणेशः, उज्जैनः

अङ्क- ३४ वेदविद्या
जुलाई - दिसम्बर २०१९ ISSN-२२३०-८९६२
UGC 'CARE' list Sl.No. 97

# वेदाध्ययनविमर्शः

**डॉ. शैलेन्द्रप्रसाद उनियालः**

समाजं व्यवस्थापयितुं यथा धर्मशास्त्रीयनियमाः नियामकाः भवन्ति तथैव वेदाध्ययनं सम्पादयितुं शिक्षाप्रातिशाख्ययोः नियमाः नियामकाः। वेदाध्ययनस्य पञ्चसु विधासु[1] गुरुमुखाद् वेदाक्षरग्रहणमेवादावापतति। तच्च वेदाध्ययनमुपनीतेन[2] कर्त्तव्यम्। तथा हि मनु आचार्यलक्षणं ब्रुवन् कथयति उपनीय तु यः शिष्यं वेदमध्यापयेद्विजः[3] इति॥ उप समीपे गुरोः नीयते वेदाध्ययनार्थं (वटुः) इत्युपनयनम्। उपनयनानन्तरं गुरुः शिष्यं शौचाचारादिकं[4] सन्ध्योपासनं च प्राक् शिक्षयित्वा ततः वेदाध्ययनार्थं प्रवर्तयति।

आसृष्टेः सुदीर्घकालाद्वेदाध्ययनपरम्परा गुरुशिष्यपरम्परयानवच्छिन्ना समागच्छति।[5] अविकृत-वेदपाठपरम्परायाः रक्षायै ऋषिभिः पूर्वाचार्यैश्च विभिन्नाः विधयः परिकल्पिताः। आदौ हि अतिव्युत्पन्नाः निर्मलान्तः करणाः तपस्विनः आप्तपुरुषा आसन्। तपसः प्रभावेण श्रवणानन्तरं तत्कालमेव वेदाक्षरधारणे सक्षमा आसन्। वेदाक्षरग्रहणे श्रवणपरम्परैव एका आसीदिति कृत्वा श्रवणाच्छ्रुतिरितिसंज्ञा व्यवहारात्प्रवृत्ता। ततो व्यतीते सुदीर्घकाले भाविजनान् मन्दधिषणान् दृष्ट्वा वेदपाठस्वरूपस्याविकृतरूपरक्षायै पूर्वाचार्यैः काचित्परिपाटिराविष्कृता। यया परिपाट्या वेदाभ्यासे कृते सति विद्या सुदृढा भवतीति। यद्यपि त्रिकालदर्शिभिः ऋषिभिः शिक्षाग्रन्थेषु प्रातिशाख्यग्रन्थेषु[6] च सङ्केतरूपेण मार्गदर्शनं कृतवन्तस्तथापि अर्वाचीनैस्तमनुसृत्य अभ्यासविधि सृष्टः। तत्कथमित्यग्रे क्रमशः प्रदीयते ।

---

१ वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासोहि पञ्चधा॥ वाधूलगृ.वृ.रह. ४.१४१

२ उपनीयगुरुः शिष्यमुपाकृत्य यथाविधि।
काण्डव्रतं समादिश्य वेदमध्यापयेत्ततः॥ वाधूलगृ.वृ.रह. ४.१४०

३ उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सङ्कल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥ मनु. २.१४०

४ उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः।
आचारमग्निकार्यं च सन्ध्योपासनमेव च॥ मनु. २.६९

५ वेदाध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा॥ (श्लो.वा.वाक्याधिकरणम् १.१.६)

६ क्रमः स्मृतिप्रयोजनः। वा. प्राति.

**ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा।**
**संहृत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः॥**[१]

**कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः।**
**स्वस्थः प्रशान्तो निर्भीतः वर्णानुच्चारयेद्बुधः॥**[२]

**प्रणवं प्राक्प्रयुञ्जीत व्याहृतिस्तदनन्तरम्।**
**सावित्रीं चानुपूर्वेण ततो वेदान् समारभेत्॥**[३]

**हस्तौ सु संयुतौ धाय जानुभ्यामुपरिस्थितौ।**
**गुरोरनुमतिं कुर्यात्पठन्नान्यमतिर्भवेत्॥**[४]

यतो हि गुरोः सकाशाद्वेदाध्ययनं विधीयतेऽतो वेदाध्ययनात्पूर्वं गुरुं विधिनाऽभिवाद्य वेदारम्भं कुर्यात्।[५]

अध्ययनावसरे सुदृढं विद्याग्रहणाय बाह्यविषयेभ्यो विनिवृत्य एकाग्रमनसा प्रसन्नचेतसा वेदाध्ययनं कुर्यात् । प्रथमतः ओंकारोच्चारणं कृत्वा ततो व्याहृतीनां तत्पश्चाद्गायत्रीमन्त्रस्योच्चारणं कुर्यात्।[६] ततो वेदमन्त्रान् पठेत्। एतत् सर्वं सर्ववेदसामान्यवेदाध्ययनप्रारम्भे सामान्यविषयः। कुत्रचित् 'हरि+ओम्' इति सर्वोदात्तः, आद्युदात्तो वा उच्चारयन्ति। कुत्रचिच्छाखायां 'ओंकारमात्र-मुच्चार्य' सम्प्रदायागतं वन्दनं विधाय वेदारम्भं कुर्वन्तीति। परिशिष्टभागे एतस्मिन् विषये चित्रेण साकं स्वरसञ्चालनं प्रदश्र्यते (द्रष्टव्यम् चित्रसंख्या २-३)।

शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखायां तु विशेषः –

त्रैस्वर्यसञ्चालनप्राधान्यादत्र 'हरि+ओम्' इत्यत्र हरि ओम् इति आद्युदात्तं स्व साकं विसर्गस्यो-भयक्षेपं दर्शयन्ति। केचित्तु हरि+ओम् इत्येकश्रुत्या उच्चार्य मकारं वामतः मुष्ट्याकृत्या स्थापयन्ति।[७]

---

१ मनु. २.७१

२ मा. शिक्षा २.२३

३ याज्ञ. शिः २.२२

४ सम्प्र. प्र. शि. ७

५ ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा। संहृत्य हस्तावाध्येयं स हि ब्रह्माञ्जलिः स्मृतः॥ मनु २.७१
अभिवादविधिः -
व्यत्यस्तपाणिना कार्यमुपसङ्ग्रहणं गुरोः। सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः॥ मनु. २.७२

६ ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं पूर्वं पुरस्ताच्च विशीर्यति॥ मनु. २.७४
ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः। त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्॥ मनु. २.८
प्रणवं तु प्लुतं कुर्याद् व्याहृतीर्म्मात्रिका विदुः॥ याज्ञ. शि. १.१७
प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्। सावित्रीं चानुपूर्व्येण ततो वेदान् समारभेत्॥ याज्ञ. शि. २.२२

७ वेदारम्भे हरिः शब्दः पदवत् पठ्यते यदि । आद्युदात्तः प्रयुज्येत स्वरितान्त इति स्फुटम्॥
कथने संहितावत्स्यादनुदात्तो रिवर्णकः। प्रणवस्तु प्लुतो ज्ञेय उदात्तः सर्वदा बुधैः॥
सर्वारम्भे हरिः ओं स्यात् कर्मकाण्डसमर्चने। केवलं प्रणवो योज्यो होमे प्रत्याहृति स्फुटम् ॥ सम्प्र. शि. २७.२९

**त्रैस्वर्यलक्षणविचारः**

यज्ञात्मनस्तस्य परमेश्वरस्य यज्ञेनैव यजनीयत्वादस्ति सर्वत्र यज्ञेषु यजुर्वेदस्यैव प्राधान्यम्। अध्वर्युः कर्मसु वेदयोगादिति[१] प्रमाणमनुसृत्य अध्वर्युशब्दस्य[२] निर्वचने कृते सत्यप्ययमेवाशयः प्रत्येति। सोऽयं यजुर्वेदः शुक्लकृष्णत्वेन द्विधा विभक्तः सम्प्रदाये प्रसिद्धः। तत्र शुक्लयजुर्वेदः माध्यन्दिनशाखीयः पाठे त्रैस्वर्ययुक्तः। अतो वेदपाठधर्मनियामकस्तत्संबद्धः याज्ञवल्क्यशिक्षाग्रन्थः 'अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः'[३] इति सन्दर्भेण प्रारभ्यते। साम्प्रतं समुपलब्धासु चतुर्वेदान्तर्गतासु वेदशाखासु हस्तप्रदर्शनपूर्वकम् उदात्तानुदात्तस्वरितानां निर्देशः अनयैव शाखया विधीयते। अत एव वाजसनेयिप्रातिशाख्यं ह्युच्यते हस्तेन ते।[४] ते उदात्तादयः स्वराः हस्तसञ्चालनेन प्रदर्शनीयाः।

यतो हि त्रैस्वर्यसञ्चालनपरेयं शाखा -

> **यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत्।**
> **यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति॥**[५]

हस्तेन साकं वर्णोच्चारणव्यवस्थापि शाखायां निर्धार्यते। तद्यथा -

> **माध्यन्दिनशाखायामस्ति हस्तेन बोधनम्।**
> **उदात्तादिस्वराणां यज्ज्ञातव्यं तदधीतिभिः॥**[६]
>
> **समुच्चारणयेद्वर्णान् हस्तेन च मुखेन च।**
> **स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ॥**[७]
>
> **हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।**
> **कामनाहानिसन्तप्तो वियोनिमधिगच्छति॥**[८]
>
> **हस्तभ्रष्टः स्वरभ्रष्टो न वेदफलमश्नुते॥**[९]

हस्तेन स्वरप्रदर्शनव्यवस्था माध्यन्दिनशाखायां सुव्यस्थिततया दृश्यते। परन्तु अन्यासु शाखासु नेयं व्यवस्था सुदृढतया दृश्यते। कृष्णयजुर्वेदिनः हस्तेन स्वरप्रदर्शनं न कुर्वन्ति। सामवेदिनस्तु

---

१ का.श्रौ.सू.

२ अध्वर्युः अध्वरयुः यूनक्ति अध्वरम् अध्वरस्य नेता वा। निरु. १.८.१

३ याज्ञव.शि. १.१

४ वाज.प्रा. १.१२१

५ याज्ञ. शि. २.४७

६ सम्प्रदाय प्र.शि.श्लो. ३०

७ सम्प्रदाय प्र.शि.श्लो. ३१

८ सम्प्रदाय प्र.शि.श्लो. ३३

९ सम्प्रदाय प्र.शि.श्लो. ३२

अङ्गुल्या कुर्वन्ति। **'हस्तभ्रष्टः स्वरभ्रष्टो न वेदफलमश्नुत'** इति वाक्येन यस्यां शाखायां यथा स्वरसञ्चालननियमः शिक्षाप्रातिशाख्याभ्यां नियम्यते तथैव ते पालनीयाः, अन्यथा दोषश्रवणात्।[१] स्वाध्यायपारायणादौ अध्ययनविधिनैव स्वराः प्रदर्शनीयाः। कर्मकाण्डप्रयोगादौ तु हस्तयोः कुत्रचिद् व्यापृतत्वात् कण्ठस्वरेणैव मन्त्रपाठः कर्तव्यः। त्रैस्वर्ययुक्तस्य शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखीयाः कण्ठस्वरेण साकं हस्तेनापि स्वरप्रदर्शनीयत्वाद् हस्तसञ्चालने नियमा विचारयन्ति।

**हस्तस्वरसञ्चालननियमाः**

उदात्तानुदात्तस्वरिताः स्वराः[२] माध्यन्दिनशाखायां सुस्पष्टतया हस्तेन प्रदर्श्यन्ते। तत्र सर्वं खलु हस्तप्रयोगजातं नियामकशास्त्रेण नियम्यन्ते। तान्यत्र प्रमाणानि यथाशास्त्रमूलानि प्रस्तूयन्ते।

**उदात्तमूर्ध्वं हस्तेन स्वरितं मध्यमस्तथा।**
**प्रचयं स्वरितस्थानेऽनुदात्तं दर्शयेदधः॥**

**द्रुतवृत्तौ दृढाभ्यासे प्राप्ते वयसि वैदिकाः।**
**यथाशास्त्रं दर्शयन्ति हस्तं प्रादेशगामिनम्॥**

**उदात्तं तु भ्रुवः प्रान्ते स्वरितं नासिकाग्रतः।**
**हृत्प्रदेशेऽनुदात्तं तु तिर्यग् जात्यादिकान् स्वरान्॥**[३]

माध्यन्दिनीयशाखायां उदात्तस्वरस्योच्चारणसमये सामान्यतः हस्तस्थानमूर्ध्वं भवति। यदा स्वरितस्योच्चारणं भवति तदा मध्ये हस्तस्थानं भवति। प्रचयसञ्ज्ञका अपि वर्णाः स्वरितस्थाने एव तिष्ठन्ति।[४] तत्र स्वराणां परिचय एवं क्रियते यत् यस्य वर्णस्य उपरिष्टात् अधस्ताद्वा किमपि चिह्नं न प्रदीयते तदुदात्तः स्वरः।[५] यस्याधस्तात् तिर्यग् रेखा दीयते (दृश्यते) तदनुदात्तः स्वरः।[६] यस्योपरिष्टात् ऊर्ध्वरेखा दृश्यते स स्वरितस्वरः।[७] यस्य वर्णस्याधस्तात् चिह्नं दृश्यते स जात्यस्वरः।[८] वर्णस्याधस्तादेव यदा दृश्यते असौन्युब्जस्वरः।[९] उदात्तविषये विशेषविवरणं प्राप्यते यथा -

---

१ हस्तहीनं तु योऽधीते मन्त्रं वेदविदो विदुः। न साधयेद्याजुषाणि भुक्तमव्यञ्जनं यथा॥
ऋचो यजूँषि सामानि हस्तहीनानि यः पठेत्। अनृचो ब्राह्मणस्तावद्यावत् स्वरं न विन्दति॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्। ऋग्यजुः सामभिर्दग्धो वियोनिमधिगच्छति॥ या.व.शि. २.३९-४१

२ माध्यन्दिनीयशाखायां संहितायां यः स्वराः। उदात्तनीचस्वरिताः प्रचयो नैव गण्यते॥ सम्प्र.प्र.शि. ४४

३ सम्प्र. शि. श्लो. ३५-३७

४ स्वरितादनुदात्ता ये प्रचयाँस्तान्प्रचक्षते। याज्ञ.शि.
उदात्तोऽचिह्न एवं च प्रयोऽपि भवेत्तया। परं स्वरितपूर्वस्तु प्रचयः सर्वथा भवेत्॥ सम्प्र.प्र.शि. ३९

५ परोऽचिह्न उदात्तकः। सम्प्र.प्र.शि. श्लो. ४०

६ नीनै रेखानुदात्तस्य वर्णाधो लिख्यते ऋजु॥ सम्प्र.प्र.शि.श्लो. ४३

७ स्वस्तिस्य भवेद्रेखा वर्णस्योपरिलम्बिता। सम्प्र.प्र.शि.श्लो. ४

८ उत्तानशायिते षष्ठे चाङ्के न्युब्जं विदुर्बुधाः। सम्प्र.प्र.शि.श्लो. ५६

९ मुद्रणे च चतुर्थाङ्का मध्यावर्तः प्रकीर्तितः। अत्र पूर्वेऽनुदात्ताङ्के वर्णे मध्ये भवेद् भ्रमिः॥ सम्प्र.प्र.शि.श्लो. ५८

**आद्यानुदात्तात् स्वरितात् पूर्वो न्युब्जात्परस्तथा।**
**अवसानेऽनुदात्ताच्च परोऽचिह्न उदात्तकः॥** [1]

**अनुदात्तपरो ह्येकोऽन्यः पूर्वः स्वरितस्य च।**
**उदात्तो द्विविधो ह्येवं हस्तनिर्देशने भवेत्॥**
**पूर्वो वामे प्रदर्श्यस्तु ऊर्ध्वं चैव द्वितीयकः॥** [2]

उदात्तस्वरे हस्तस्थितिः कुत्र कुत्र सामान्यतः प्राप्यते इत्यस्य चर्चा पूर्वोक्तैः श्लोकैः विधीयते।

१. मन्त्रारम्भे आद्यानुदात्तात् पूर्वो यः चिह्नरहितवर्णः स उदात्तः। एतस्यां स्थितौ हस्तसञ्चालनं वामतः प्रारभ्यते। यथा - **अम्बे अम्बिके।**

२. स्वरितात् पूर्वो य उदात्तः (किमपि चिह्नरहितः) तत्र उपरिष्टात् हस्तस्वरः प्रारभ्यते। यथा- **'आहमजानि'**।

३. न्युब्जस्वरात्परः यो वर्णः चिह्नरहितः तत्र हस्तस्य गतिः ऊर्ध्वं भवति।

४. मन्त्रावसाने यदा अनुदत्तात्परः वर्णः उदात्तत्वेनागच्छति तदा हस्तगतिः दक्षिणतः भवति।

**अनुदात्तविवरणम्**

**अनुदात्ता यदैकत्र ह्यनेके लक्ष्मतो यदि।**
**तत्रान्त्ये तु करं नीचै-र्मध्ये पूर्वेषु दर्शयेत्॥**
**उदात्तव्यवधाने स्वरितो लक्ष्मतो भवेत्।**
**पूर्वोऽनुदात्तचिह्ने तु नीचैर्हस्तं प्रदर्शयेत्॥**
**यद्युदात्तव्यवायेनानुदात्ताङ्कः पुनर्भवेत्।**
**तदा दक्षिणपार्श्वेऽग्र्यमनुदात्तं प्रदर्शयेत्॥**
**यद्यव्यवहितं लक्ष्म मध्यावर्तात्पुरो भवेत्।**
**तत्र भ्रमिः प्रदर्श्यन्तु नीचैश्चिह्ने यथागुडु॥**
**न्युब्जचिह्नेऽव्यवहितेऽनुदात्ते पिण्डदानवत्।**
**करः एवं पञ्चधा स्यादनुदात्तप्रदर्शनम्॥** [3]

अत्रेदमुच्यते यत्र एकाधिकानामनुदात्तानां युगपत्प्राप्तिर्भवति तत्रान्तिमेऽनुदात्ते हस्तस्वरः नीचैर्गच्छति । यथा - **हिरण्यगर्भः**।

शुक्लयजुर्वेदीयमाध्यन्दिनशाखायाः स्वराङ्कितानां वर्णानामाधारेण एव स्वरसञ्चालनं भवतीति सर्वदाध्येयम्। अनेनैव नियमेन यदा अनुदात्तानन्तरं उदात्तः ततः स्वरितश्चेदागच्छति तदा

१ सम्प्र.प्र.शि.श्लो.४०

२ सम्प्र.प्र.शि.श्लो. ४५

३ सम्प्र. प्र. शि. श्लो. ४६-५०

पूर्वानुदात्ते हस्तः नोचैर्गच्छति। यथा - गणान्त्वा....... यदानुदात्तानन्तरमुदात्तः ततः पुनरनुदात्तः ततः पुनरुदात्तः समागच्छति तर्हि प्रथमानुदात्तः दक्षिणे तिष्ठति। यथा - **'जगत्यनुष्टुप्पङ्क्त्या सह'**

यदा जात्यस्वरात् (_) पूर्वमनुदात्तस्वरः समागच्छति तर्हि तत्र हस्तस्थितिः मध्ये कृत्वा हस्तभ्रामणं क्रियते। तत्रोदाहरणरूपेण उदरगतवायोः सम्भ्रमणं यथानुभूयते तथा भ्रामयेत्। यथा- ब्राह्मणोऽस्य। न्युब्जस्वरे तु पूर्वमनुदात्तस्वरस्तिष्ठत्येव तत्रानुदात्तस्वरे हस्तं पिण्डदानमुद्रावत्कृत्वा ततोऽधः प्रदर्शयेत्। यथा- **'बृहत्त्युष्णिहा'**

उदात्तानुदातस्वरितन्युब्जजात्यानां चिह्नस्वरूपं सोदाहरणं विवेच्येदानीं तेषां हस्तसञ्चालन-सन्दर्भे नियमाः विविच्यन्ते।

**हस्तसञ्चालनविधिः**

स्वाध्यायरम्भे गुरोः सन्निधावुपविश्य स्वस्थः प्रशान्तः निर्भीतः वर्णानुच्चारयेत्।[१] उरोः तृतीयभागे वाममुष्टिं निधाय दक्षिणाकूर्परं तदुपरि विन्यस्य[२] प्रादेशोद्देशमात्रेण[३] हस्तसञ्चालनं कुर्यात्। तत्रोच्यते हस्तसञ्चालने परिधिः। सामान्यतः हस्तस्थितिः मध्ये हृदयस्थाने भवति। ततः स्वरितस्वरप्रदर्शनार्थमुच्चैः त्र्यङ्गुलमुन्नतं भवति। अनुदात्ते खलु नवाङ्गुलं नीचैर्गच्छति। उदात्ते तु हृत् स्थानात् नवाङ्गुलमुपरि गच्छति।[४] अयमेव विषयः प्रकारान्तरेण शरीरावयवेन साकं प्रदर्श्य प्रतिपादयति -

**उदात्तं तु भ्रुवः प्रान्ते प्रचयं नासिकाग्रतः।**
**हृत्प्रदेशेऽनुदात्तं तु तिर्यग् जात्यादि रीरितः॥**[५]

स्वरितस्य पञ्चभेदाः शास्त्रेषूपदिष्टाः। क्वचिच्चत्वारो भेदाः। हस्तसञ्चालने तेषां भेदः उपदिश्यते यथा -

**स्वरितः पञ्चधा ज्ञेयो हस्तनिदर्शने बुधैः।**
**स्पष्टस्वरित एकस्तु प्रचयश्च द्वितीयकः॥**
**मध्यावर्तस्तृतीयस्तु दक्षन्युब्जाश्चतुर्थकः।**
**नीचन्युब्ज पञ्चमश्च नान्यथा दर्शनं क्वचित्॥**[६]

तत्र मुख्यस्वरितस्वरस्वरूपं तु एवं प्रतिपाद्यते -

---

१ सुप्रसन्नमना भूत्वा किञ्चिन्नम्रस्त्वधोमुखः। निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्॥ याज्ञ.शि. २.२१

२ हस्तौ सुसंचतौ धार्यौ जानुनोरुपरि स्थितौ।
गुरोरनुमतिं कुर्यात् पठन्नान्यमतिर्भवेत्। उरुभागे तृतीये तु कूर्परं न्यस्य दक्षिणम्॥ याज्ञ. शि. २.१९-२०

३ उत्तानं सोन्नतं किञ्चित् सुव्यक्ताङ्गुलिरजितम्। स्वरविच्च करं कुर्यात् प्रादेशोद्देशगामिनम्॥ याज्ञ.शि. ३.५१

४ अङ्गुष्ठस्योत्तरं पर्व तर्जन्युपरिमद् भवेत्। प्रादेशस्य तु सोद्देशस्तन्मात्रं चालयेत्करम्।
स्वरिते त्र्यङ्गुलं विद्यान् निपाते तु षडङ्गुलम्। उत्थाने तु नवाङ्गुल्यमेतत् स्वरस्य लक्षणम्॥ याज्ञ. शि. ३.५४

५ याज्ञ. शि. ३.५५

६ सम्प्र. प्र. शि. श्लो. ५१-५२

**उर्ध्वस्थानात् पात्यते तु स्पष्टस्वरितचिह्नतः।**
**स्वरितात्परतोऽचिह्नो वर्णः प्रचयसंज्ञकः॥** [१]
**मध्ये प्रदर्शनं तस्य स्वरितस्थानतो भवेत्।**
**स्वरितानुदत्तचिह्नं यत्संश्लिष्टं दृश्यतेऽथवा॥** [२]
**मुद्रणे च चतुर्थाङ्को मध्यावर्तः प्रकीर्तितः।**
**अत्र पूर्वेऽनुदात्ताङ्के वर्णे मध्ये भवेद् भ्रमः॥**
**मध्यावर्ते भ्रमेर्बाह्यं प्रापयेत्स्वरिते करम्।**
**उत्तानशायिते षष्ठे चाङ्के न्युब्जं विदुर्बुधाः॥** [३]
**तत्र पूर्वेऽनुदात्ताङ्के पितृपिण्डप्रदानवत्।**
**हस्तः प्रदर्शनीयस्तु न्युब्जे तु न्युब्जता भवेत्॥**
**न्युब्जाङ्कतोऽनुदात्ता दृश्ये दक्षे प्रदर्शनम्॥** [४]
**स्वरिताको दृश्यते चेत् तदानीचैः प्रदर्शनम्।**
**उभयत्राप्युदात्तः स्वं स्थानं मध्यगतो लभेत्॥** [५]

एषां श्लोकानामयमाशयो यत् प्रथमतः स्वस्तिस्वरः वर्णोपरि विन्यस्त इति सामान्यमनियमः। द्वितीयस्तावत्स्वरितस्वरात्परं विद्यमानानां स्वरद्योतकानां चिह्नरहितानां वर्णानां 'प्रचय' संज्ञा भवति। प्रचयत्वेनाभिहिता वर्णाः स्वरितस्थानभागिनो भवन्ति। तृतीयस्तु जात्यस्वरो भवति। तत्स्थाने हस्तभ्रामणं कृत्वा जात्यस्वरस्य प्रदर्शनं क्रियते। चतुर्थः न्युब्जस्तत्र पिण्डदानवत् हस्तं कृत्वा स्वरप्रदर्शनं क्रियते। पञ्चमस्तु न्युब्ज एव स्वरितपूर्वो यदा भवति तदा तत्र न्युब्जप्रदर्शनं नीचैः कृत्वा प्रदर्श्यते। उभयत्रापि अनुदात्तस्थाने हस्तः मध्यगतो भवति। अर्थादीना जात्यादीनां स्वराणां कुत्र प्राप्तिर्भवति तद्विचार्यते -

हस्तसञ्चालनविधावङ्गुलिप्रक्षेपणस्य विधिः समागच्छति। तत्रोच्यते -

**अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम्।**
**जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथा परः॥**
**तैरीव्यञ्जनसंज्ञश्च तथा तैरोविरामकः।**
**पादवृत्तो भवेत्तद्वत् ताथाभव्यमिति स्वराः॥**

१ सम्प्र शि श्लो. ५३
२ सम्प्र. प्र. शि. श्लो. ५४
३ सम्प्र. प्र. शि. श्लो. ५६
४ सम्प्र.प्र.शि.श्लो. ५८
५ सम्प्र.प्र.शि.श्लो. ५८

**एकपदे नीचपूर्वः सयवो जात्य इष्यते।**
**अपूर्वोऽपि परस्तद्वत् धान्यं सुष्वा स्वङ्गत्यपि॥**[१]

**१. जात्यः -**

यत्र अनुदात्तात्परः नीचपूर्वः अपूर्वोऽपि समकारः सवकारो वा जात्यस्वरो भवति। यथा - धान्य[२], सुप्वा[३], स्वः[४], मनुष्यानिति[५]।

**२. अभिनिहितः -**

**एओआभ्यामुदात्ताभ्यामकारो निहितश्च यः।**
**स च यत्र प्रलुप्येत तं चाभिनिहितं विदुः॥**[६]

यथा - ते + अप्सरसाम् = तेप्सरसाम्।[७] वेदः + असि = वेदोसि।[८]

**३ क्षैप्रः -**

**इउवर्णौ यदोदात्तावापद्येते यवौ क्वचित्।**
**अनुदात्ते परे नित्यं विद्यात् क्षैप्रस्य लक्षणम्॥**[९]

यथा = त्रि + अम्बकम् = त्र्यम्बकम्।[१०] द्रु + अन्नः = द्रुन्नः।[११]

**४. प्रश्लिष्टः -**

**इकारो यत्र दृश्येत इकारेणैव संयुतः।**
**उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः॥**[१२]

यथा - अभि + इन्धत्ताम्।[१३] तत्र प्रातिशाख्ये - सि ठे सवर्णे दीर्घम्।[१४] इवर्णमुभयतो ह्रस्वमुदात्तपूर्वमनुदात्त पर स्वरितम्।[१५] इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः।[१६]

---

१ याज्ञ. शि. ४.७८
२ शु.य.सं. १.२०
३ शु.य.सं. १.२
४ शु.य.सं. १८.६४
५ शु.य.सं.३४.६
६ याज्ञ. शि. ४.७९
७ शु.य.सं. २४.३७
८ शु.य.सं. २.२१
९ याज्ञ. शि. ४.८०
१० शु.य.सं. ३.६०
११ शु.य.सं. ११.७०
१२ याज्ञ.शि. ४.१२
१३ शु.य.सं. ४.५१
१४ शु.य.प्रा. ४.५१
१५ शु.य.प्रा. ४.१३३
१६ शु.य.प्रा. १.११६

५. **तैरोव्यञ्जनः -**

**उदात्तपूर्वः स्वरितो व्यञ्जनेन युतो यदि।**

**एष सर्वो बहुस्वारस्तैरोव्यञ्जन उच्यते॥**[१]

**यदि व्यञ्जनेन संयुक्तस्वरित उदात्तपूर्वः।**

बहवोऽनेके स्वराः स्वरिताः यस्मिन् पदसमूहः, स एष बहुस्वारः बहुस्वरितविशिष्टः पदसमूहः तैरोव्यञ्जनः। यथा - इडे + एते + हव्ये + काम्ये + चन्द्रे + ज्योते + अदिति + सरस्वति + महि + विश्रुतिः इडे हव्ये काम्ये चन्द्रे ज्योतेदितिसरस्वति महिविश्रुति॥[२]

६. **तैरोविरामः -**

**अवग्रहात्परो यस्तु स्वरितः स्यादनन्तरः। तैरोविरामं तं विद्यादुदात्तो यद्यवग्रहः॥**[३]

यः स्वरितः अवग्रहात् पञ्चविध-कृत्तद्धितादिविच्छेदादनन्तरः व्यवधानरहितः दृश्येत स अवग्रहः छिन्नस्य वृत्तिपूर्वखण्डस्य विरामात्मकः यदि उदात्तविशिष्टः भवेत्, तदा तं उदात्तावग्रहात्परं स्वस्तिम्, तिरः तिर्यग् विरम्यते उदात्तः अनेन इति तिरोविरामः स एव तैरोविरामः इति विजानीयात्। यथा- गोपताविवतिगो पत्तौ।[४] इत्यत्र द्वितीयावृत्तौ यो गकारोत्तरः ओकारः उदात्तावग्रहः, तत्स्यात्परो यः पकारोत्तरवर्ती स्वरितोऽकारः, स तैरोविरामसंज्ञकः। तथाहि प्रातिशाख्ये 'समासेऽवग्रहो ह्रस्वसमकालः।'[५]

७. **पादवृत्तः -**

**स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते।**

**पादवृत्तो भवेत्स्वराः 'श्वित्रऽआदित्य'दर्शनम्॥**[६]

स्वरिते स्वरितत्वविशिष्टे स्वरे अकारादौ सवर्णे परे सति विवृत्तिः स्वरयोर्मध्ये सन्ध्यभावलक्षणा भवति। स्वरः स्वरितत्वविशिष्टोऽक्षरः। पदस्यायं विरामो विवृत्तिलक्षणः पादः तेन सह भज्यते। यथा - श्वित्र ऽ आदित्यानाम्।[७]

८. **तथाभाव्यः -**

**उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः।**

**तथाभाव्यो भवेत्स्वारस् 'तनू-नप्त्रे' निदर्शनम्॥**[८]

---

१ याज्ञ.शि. ४.८२

२ शु.य.सं. ८.४३

३ याज्ञ.शि.४.८३

४ शु.य.सं. १.१

५ शु.य.प्राति. ५.१

६ याज्ञ.शि. ४.८४

७ शु.य.सं. २४.३९

८ याज्ञ.शि. ४.८

द्वयोरुदात्ताक्षरयोर्मध्ये यदि नीचः, अनुदात्तत्वविशिष्टाक्षरम्। अवग्रहः वृत्तिच्छेदलक्षणो विरामो भवेत्। तदा स्वरितः तथाभाव एव ताथाभाव्यं स्यात्। तथाह प्रातिशाख्ये-उदात्ताच्चानुदात्तः स्वरितमिति।[१] निहितमुदात्तस्वरितम्।[२]

**डॉ. शैलेन्द्रप्रसाद उनियालः**
प्राध्यापकः (सं.) वेदविभागः
राष्ट्रियसंस्कृतसंस्थानम् (समविश्वविद्यालयः)
श्री रघुनाथकीर्तिपरिसरः, देवप्रयागः, पौडीगढवालः, उत्तराखण्डः

**सहायकग्रन्थसूची -**

*मनुसंहिता (मनु.),* सम्पा. मानवेन्दुवन्दोपाध्यायः, कोलकाता : संस्कृतपुस्तकभाण्डार, २०१२।

*निरुक्तम् (निरु.),* सम्पा. मुकुन्दझा, वाराणसी : चौखाम्बासंस्कृतप्रतिष्ठान, २००५।

*शुक्लयजुर्वेद (माध्यन्दिनसंहिता – श.यु.वे.),* सम्पा. रामकृष्णशास्त्री, वाराणसी : चौखम्बाविद्या-भवन, २०१३।

*कात्यायनश्रौतसूत्रम् (का.श्रौ.सू.),* सम्पा.विद्याधरशर्मा, वाराणसी : चौखाम्बासंस्कृतप्रतिष्ठान, २००५।

*श्लोकवार्तिकः (श्लो.वा.),* सम्पा. द्वारिकादासशास्त्री, वाराणसी : तारापब्लिकेशनस्, १९७८।

*शिक्षासङ्ग्रहः (शि.सं.),* सम्पा. रामश्यामचतुर्वेदी, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९०।

*याज्ञवल्क्यशिक्षा (या.शि.),* सम्पा. नरेशझा, वाराणसी : चौखाम्बासंस्कृतप्रतिष्ठान, १९९५।

*वाजसनेयिप्रातिशाख्यम् (वा.प्रा.),* सम्पा. बि. वेङ्कटरामशर्मा, मद्रदुरीयविश्वविद्यालयः, १९९५।

१ शु.य.प्राति. १.३५

२ शु.य.प्रा. ४.१३६

अङ्क- ३४
जुलाई - दिसम्बर २०१९

वेदविद्या
ISSN-२२३०-८९६२
UGC 'CARE' list Sl.No. 97

# आचार्यमध्वदृष्ट्या वेदानां महत्त्वम्

डॉ. नारायणः

**माध्वदर्शने वेदानां स्थानम्**

प्रायः बहूनां दार्शनिकानां वेदभाष्यकाराणामियं साधारणधारणा भवति यत् संहिताब्राह्मणादिरूपो वेदः कर्मबोधकः उपनिषदः केवलमध्यात्ममवगमयन्त्यः ब्रह्मविद्या इति। परन्तु मध्वाचार्याणां दृष्टिर्विषयेऽस्मिन् भिद्यते। स्वीयवेदान्ततत्त्वप्रतिपादनायाचार्यमध्वैः शास्त्रत्वेन परमप्रमाणत्वेन परिगणितेषु अपौरुषेयं वैदिकं साहित्यम् अत्युन्नतं परमप्रमाणस्थानं भजते। तदुक्तमाचार्यैः

**ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम्। मूलरामायणं चैव पुराणं चैतदात्मकम्॥ ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः। दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः॥ ज्ञेय एतैस्सदायुक्तैर्भक्तिमद्भिः सुनिष्ठितैः॥ न च केवल तर्केण नाक्षजेन न केनचित्। केवलागमविज्ञेयो भक्तैरेव न चान्यथा॥**[1] इति ब्रह्माण्डपुराणे

एवं स्वीयसिद्धान्तप्रतिष्ठापनाय वेदानामेव परममुख्यप्रामाण्यं तदनुयायित्वेनैवान्येषाञ्च। सदागमैकविज्ञेयत्वं हि तत्प्रतिपादिततत्त्वेषु परममुख्यं तत्त्वम्। तच्च वेदवचनैरेव साधितम्।

**नेन्द्रियाणि नानुमानं वेदा ह्येनं वेदयन्ति तस्मादाहुर्वेदाः नावेदविन्मनुते तं बृहन्तं सर्वानुभुमात्मानं साम्पराये।**[2] **औपनिषदः पुरुषः**[3]

**सर्वज्ञं सर्वकर्तारं नारायणमनामयं सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि।**

योऽयं[4] सर्वोत्तमः सर्वज्ञः सर्वकर्ता, परमात्मेति प्रसिद्धः सः प्रत्यक्षेण वानुमानेन न वेद्यत इति सर्वानुभवसिद्धम्। ये केचनानुमानं प्रमाणयन्ति, तेऽवश्यमेव सत्प्रतिपक्षानुमानं परिहरेयुः। केवलं

१ विष्णुतत्त्वविनिर्णयः
२ तैत्तिरीयश्रुतिः
३ विष्णुतत्त्वविनिर्णयः
४ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।

हि अनुमा कामचारिणीत्यपि दार्शनिकास्सर्वेऽपि मन्यन्ते[१]। तर्हि नान्यत्प्रमाणमवशिष्टं परमात्म-विज्ञानायेति तमाहुर्वेदाः औपनिषदः पुरुषः इति।

**सम्प्रत्युपलभ्यमाना वेदाः कथमाविष्कृताः**

श्रीमद्ब्रह्मसूत्रभाष्ये सूत्राणाम् उपादेयत्वं व्याख्येयत्वञ्च प्रतिपादयितुमाचार्यैः तत्प्रामाण्य-व्यवस्थापनाय काचित्पौराणिकी कथा समुट्टङ्किता। द्वापरे सर्वत्र ज्ञान आकुलीभूते ...... इत्यादिना भाष्येण। सा कथा एवमस्ति –

कदाचिद्दुर्भिक्षयोपप्लुता ऋषयः गौतमतपः प्रभावसमृद्धं तदाश्रममेव शरणं जग्मुः। चिरकालं ते तपस्विजनास्तेन महात्मना परिपालिताः सम्मानिताश्च सुखमेवानुबभूवुः तत्राश्रमे यावत्सुभिक्षम्। गच्छता कालेन ते सर्वेऽपि ऋषयः सुभिक्षं स्वदेशं यियासवः महर्षिं गौतमम् अनुज्ञां याचमाना अपि नैव तदनुज्ञामापुः। एतस्मिन् एव समये स्वपत्युः शिवस्य शिरसि विद्यमानां सुरसरितं सपत्नीं ततः निष्कासयितुं चिन्तयन्ती पार्वती स्वकार्याय विघ्नेश्वरमचोदयत्। तेन च विघ्नेश्वरेण उपदिष्टाः ऋषयः स्वतपोबलेन काञ्चन गां तदाश्रमस्थसस्यग्रासिनीं विदधुः। गौतमस्तु सस्यग्रासिनीं तामपसारयितुं प्रवृत्तः। प्रवृत्तिमात्रेण सहसा निपतितां गामवलोक्य परितप्तमना बभूव। तदेव लब्धावकाशास्ते ऋषयः नायं भोज्यान्नः गौतमो ऋषिः इति ततः प्रतस्थिरे। ततः गौतमः चिरकालचीर्णतपः प्रभावेण परितोषितां शिवस्य शिरसि विद्यमानां सुरसरितं भुवमानिनाय। तया गां परिषिच्योज्जीवयामास। ततः किमेतदिति विचिन्त्य ऋषिजनकृतमक्रमादिकं सर्वं निश्चित्य तान् ज्ञानहीना भवेयुरिति श्शाप।[२]

कथेयं स्कान्दपुराणे सूचितेति तद्वचनमुदाहरन्ति भाष्यकाराः -

**नारायणाद्विनिष्पन्नं ज्ञाने कृतयुगे स्थितं।**

**किञ्चित्तदन्यथा जातं त्रेतायां द्वापरेऽखिलम्॥**

[३]यद्यपि भगवता यदुपदिष्टं तत्तथैव आसीत् कृतयुगे। त्रेतायां तत्किञ्चिदन्यथा जातं युग-धर्मानुसारम्। द्वापरे तु तद्वदेव पादद्वयमितस्यैव भगवदुपदिष्टस्य ज्ञानस्यत हानिः प्रसक्ता। परन्तु द्वापरेऽखिलं विनष्टमिति कथं युज्यते ? इत्यत्राह –

१ श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् । निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च इति कौर्मे तथा तत्रैव सर्वत्र शक्यते कर्तुमागमं हि विनानुमा । तस्मान्न सा शक्तिमती विनागममुदीक्षितुम् । इति वाराहे ब्रह्मसूत्रभाष्यम्, तत्त्व-प्रकाशिकाभावदीपे १-१-१ पृ.सं ५७ सम्पादकः रा.स्वा.पञ्चमुखी राघवेन्द्रतीर्थप्रतिष्ठानम् धारवाड् - १९९८

२ ब्रह्मसूत्रभाष्यम् - तत्त्वप्रकाशिका-भावदीपे १-१-१ पृ.सं १६ सम्पादकः रा.स्वा.पञ्चमुखी राघवेन्द्रतीर्थप्रतिष्ठानम् धारवाड् - १९९८

३ अस्य महतो भूतस्य निःश्वसितमेतत् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि अस्यैव एतानि निःश्वसितानि- इति बृहदारण्यके

**गौतमस्य ऋषेः शापाज्ज्ञानत्वज्ञानतां गते।**

**सङ्कीर्णबुद्धयो देवाः ब्रह्मरुद्रपुरस्सराः।**

**शरण्यं शरणं जग्मुः नारायणमनामयम्॥**

इत्यनेन गौतमऋषिशापवृत्तान्तः संसूचितः। एवं द्वापरे युगप्रभावेण गौतमऋषिशापेन च सम्पूर्णे ज्ञाने विनष्टे सज्जनास्सर्वे इदमदो वेति संशयेन विपरीतज्ञानेन च यदा सुदुःखिता आसन् तदा परमकारुणिकैः देवैः सम्प्रार्थितः भगवान् नारायणः व्यासत्वेनावततार। तच्चोक्तम् –

**तैर्विज्ञापितकार्यस्तु भागवान् पुरुषोत्तमः।**

**अवतीर्णो महायोगी सत्यवत्यां पराशरात्॥**

**उत्सन्नान् भगवान् वेदान् उज्जहार हरिः स्वयम्॥**

एवं सत्यवत्यां पराशरात्सञ्जातः भगवान्। अवतरणसमनन्तरमेव भगवान् पितुः द्विजत्वमवाप। जगाम च मेरुं चतुर्मुखाद्यैरनुगम्यमानः। तत्र तु सुरेभ्यो मुनिभ्यश्चादिसृष्टाविव वेदान् विभज्योपदिदेश। वेदोद्धरणं कथमकरोदित्याह –

**चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः ।**

**शतधा चैकधा चैव तथैव च सहस्रधा ।**

**कृष्णो द्वादशधा चैव पुनः तस्यार्थवित्तये ।**

**चकार ब्रह्मसूत्राणि**[1] ………………..

यद्यपि प्रागेव चतुर्धा विभक्त आसीद्वेदः[2]। तथापि नृणां स्वल्पमायुः सुमन्दां मतिमवेक्ष्य भगवान् सत्यवतीसुतः ऋङ्निगदादिरूपं वेदं पुनः एवं व्यक्तीचकार - यथोक्तं "ऋचस्स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः। यजूंषि निगदाच्चैव तथा सामानि सामतः। एवं चतुर्धाविभक्तात् मूलवेदात् उपवेदानाविश्चकार। ततः अवान्तरवेदानपि। मूलऋग्वेदात् कांश्चन भागानुद्धृत्य ऋग्वेदं, निगदात् कांश्चन भागानुद्धृत्य यजुर्वेदं तथा सामतः सामानि अथर्ववेदं चाकरोत्। ततः पुनरपि उपवेदेषु ऋग्वेदं चतुर्विंशतिशाखाभिः व्यभजत्। यजुर्वेदं एकोत्तरशतशाखाभिः, सामवेदं सहस्रशाखाभिः, तथाथर्ववेदं द्वादशशाखाभिः व्यभजत्। एवं विभजने कारणन्तु ज्ञानाकुलीभाव एवेति उपर्युक्त-कथयावगम्यते। अनेन इदं स्पष्टं भवति यत् मूलवेदादुपवेदानाम् उपवेदादवान्तरवेदानाम् ततः उपशाखाभेदेन च आविष्कारः भगवता सत्यवतीसुतेन विहित आसीत्। ततश्च स वेदव्यास इति

१ तच्चोक्तं स्कन्दे इति ब्रह्मसूत्रभाष्ये १-१-१

२ सृष्ट्यादौ ब्रह्मणो वेदा मुखेभ्यश्च विनिर्गताः तत्रैव च लयं यान्ति प्रलये समुपस्थिते - ऋक्प्रातिशाख्येऽध्यायः १

व्यवह्रियते शास्त्रेषु। सम्प्रत्युपलभ्यमाना वेदाः भगवता व्यासेनोद्धृतानां नैकशाखाभेदेनभिन्नानां वेदानां भाग एव। नेदानीं सर्वासां शाखानामुपलब्धिरस्तीति विदितमेवेदं विद्वत्प्रपञ्चे।

**वेदाः अपौरुषेयाः**

अतीन्द्रियधर्माधर्मादिसिद्धिः अपौरुषेयवाक्याङ्गीकारे एव भवति। धर्माधर्माद्यङ्गीकारस्तु सर्वसमयिभिः अवश्यं करणीय एव। यः अतीन्द्रियौ धर्माधर्मौ नाङ्गीकरोति स न समयी स्यात्। यतो हि वक्तृश्रोत्रोरभिमतम् अनन्यसाध्यं फलमधिकृत्य तद्धेतुभूतं प्रमाणान्तराप्राप्तम् अर्थं प्रतिपादयतां वाक्यानां समूहो हि शास्त्रम्। तर्हि शास्त्रग्रन्थानां कश्चन विषयः किञ्चित्प्रयोजनम् अवश्यं भवेदेव। तदभावे अशास्त्रत्वमेव स्यात्। तद्वक्ता च अशास्त्री। विषयप्रयोजनरहितेन च तेन लोकोपकारः नैव स्यात्। न च प्रत्यक्षादिसिद्धो विषयः, कृष्यादिना प्राप्यं प्रयोजनं शास्त्रस्य सम्भवति। अतः प्रत्याक्षाद्यसिद्धं धर्माधर्मादिकमेव विषयप्रयोजनत्वेन मान्यम् । धर्माधर्माद्यभाव एव शास्त्रविषयः तेन स्वच्छन्दव्यवहारादिना स्वच्छन्दसुखभोगादिप्राप्तिरेव अस्य शास्त्रस्य प्रयोजनमित्यपि न वक्तव्यम्। धर्माधर्माद्यभावज्ञाने परस्परहिंसादिना अपकारस्यैव प्राप्तेः। एवं सति लोके सर्वत्र अव्यवहार एव स्यात् परस्परहिंसादिना अपकारस्यैव प्रसङ्गः। किञ्च अदृष्टाद्यभावे धर्माधर्माद्यभावज्ञानं बोधयता तेन प्राप्यं प्रयोजनम् अपि नास्ति। अदृष्टाभावात्। अतो धर्माद्यभावं वदता स्वसमयस्य आनर्थक्यम् अङ्गीकृतमेवेति नासौ समयी। एवं च प्रत्यक्षप्रयोजनाभाव एव न, अपि तु पारत्रिकप्रयोजनमपि नास्ति अदृष्टानङ्गीकारात् (अतीन्द्रियवस्तूनाम् अनङ्गीकारात्)।

न पौरुषेयवाक्यैः धर्माधर्मादिसिद्धिः स्यात् न च पौरुषेयेण वाक्येन तत्सिद्धिः। अज्ञानविप्रलम्भयोः प्राप्तेः। पौरुषेयवाक्यैः न कदापि धर्माधर्मादिसिद्धिः स्यात्। पुरुषवाक्येषु अज्ञानविप्रलमबादिदोषप्रसक्तेः। न च तदर्थत्वेन कश्चन सर्वज्ञः कल्प्येत। एवं पुरुषवाक्येन धर्माधर्मादिसिद्ध्यर्थम् अन्यत्र अदृष्टं सर्वज्ञत्वं यदि कल्प्येत भवत्सम्मते महापुरुषे तर्हि अन्योऽपि वदेदेव भवद्गुरुः सर्वज्ञः अस्मद्गुरुरेवेति। अपि च कथञ्चित् कल्पितेऽपित् सर्वज्ञत्वे तस्मिन् अज्ञानाद्यभावकल्पनं तेन तद्वाक्यरचनादिकल्पनम् एवं बहुविधकल्पनाप्रसङ्गेन कल्पनागौरवप्रसङ्ग एव स्यात्। अतः अपौरुषेयवाक्याङ्गीकार एव योग्यः। कल्पनालाघवाच्च। अपौरुषेयत्वं च वेदानां स्वत एव सिद्धम्। वेदकर्तुः अप्रसिद्धेः सर्वत्र। वेदत्वेन प्रसिद्धानि वाक्यानि विहाय पौरुषेयवाक्येषु वेदत्वकल्पनं वा कर्तुः अप्रसिद्धिं वा कल्पयितुं शक्यते। प्रसिद्धे अप्रसिद्धत्वस्य वेदत्वस्य वा कल्पने कल्पनागौरवप्रसङ्गः। अकल्पने च वेदानाम् अपौरुषेयत्वं सिद्धमेव भवति ॥[१]

१ न चैतेषां वचनानाम् एव अप्रामाण्यम्। अपौरुषेयत्वात् वेदस्य॥ वेदवचनानि न पुरुषवचनानि अत एव तद्वचनानि प्रमाणान्येव। इतिहासपुराणः पञ्चमो वेदानां वेदः इति तद्गृहीतत्वाच्च॥ न चापौरुषेयं वाक्यमेव नास्तीति वाच्यम्। तद्भावे सर्व समयाभिमतधर्माद्यसिद्धेः॥

यथा लौकिकवाक्येषु सकर्तृकत्वं प्रसिद्धं तद्वद् वेदेष्वपि तत्सिध्यति इति चेन्न लौकिकवक्यानि सकर्तृकाणि इति तु प्रसिद्धानि वेदवाक्यानि सर्वैरपि श्रुतान्येव न केनचिदपि कृतानि इति च प्रसिद्ध-मेव। न च केनचित् कृत्वा वेद इत्युक्तं वेदसमम्। अविच्छिन्नपरम्पराभावात्। वेदमन्त्रं नूतनतया दृष्टवेदद्रष्टॄणां वचनानां जन्मान्तरसिद्धपरम्पराज्ञानात् वेदत्वमस्त्येव॥ वेदद्रष्टॄणाम् उक्तगुणवत्वाच्च इत्याह - उक्तं च ब्रह्माण्डे -

**वेदर्षीणां लक्षणम् – प्रामाण्यम् - नित्यत्वं च**

**विंशल्लक्षणतोऽनूनस्तपस्वी बहुवेदवित् ।**

**वेद इत्येव यं पश्येत् स वेदो ज्ञानदर्शनात् ॥ इति ॥**[1]

गूढवचनकारः कश्चित् स्ववाक्यं जन्मान्तरे दृष्टमिति अनृतं वदति चेदपि तस्मिन् वेदद्रष्टृलक्षणाभावात् तद्वाक्यं वेदवाक्यमिति न सिध्यति। वेदर्षिलक्षणं तु ब्रह्माण्डपुराणे उक्तं यद्वेदर्षिणः विंशतिलक्षणानि भवेयुरिति सूचितम्। अपि च स तपस्वी बहुवेदविद् भवेत्। तादृशः तपस्वी बहुवेदज्ञः यं वेद इति दृष्ट्वा उपदिशति स वेदः भवति। वेदवाक्यं ज्ञानदर्शनादेव वेदवाक्यमिति सिध्यति। एवमाचार्यैः स्वग्रन्थेषु वेदानां प्रामाण्यं नित्यत्वं च बहुधा प्रतिपादितम् केचन वदन्ति यद्वेदा अपौरुषेयाश्चेत् आप्तवाक्यत्वं न सिध्यति अतः प्रामाण्यमपि नेति चेन्न आप्तवाक्यस्य प्रामाण्यसिद्ध्यर्थम् अन्यप्रमाणवाक्यापेक्षा तस्य प्रामाण्यसिद्ध्यर्थम् अपरप्रमाण-वाक्यापेक्षा एवं च अनवस्थारूपदोष एव। अपौरुषेयवेदवाक्यानां प्रामाण्यं स्वत एव सिध्यति इति दोषाभाव एव । वेदप्रामाण्यं युक्त्यधीनम् इत्यपि न वक्तव्यं, युक्तीनां साहाय्यं वेदापौरुषेयत्वम् अनङ्गीकुर्वतः पुरुषस्य बुद्धिदोषं दूरीकर्तुमेव। न तु युक्तेः सर्वत्र आवश्यकता। यत्र बुद्धिदोषः तत्र युक्त्यवश्यकता, यत्र बुद्धिदोषाभावः तत्र वेदानाम् अपौरुषेयत्वं स्वत एव प्रामाण्यञ्च सिध्यति। अनादिकालादपि वेदोपदेशपरम्परा एव अत्र निदर्शनम्। वेदकर्तृत्वविषये परम्परागत-प्रमाणं नास्त्येव। अनादिकालादपि पूर्वजैः उपदिष्टमेव वेदं वयमुच्चायन्तः स्मः इत्येव अनुभवः प्रत्येकस्मिन् वेदवक्तरि अस्ति इदमेव वेदाः अपौरुषेयाः इत्यत्र प्रबलप्रमाणम्। तत्राचार्योदाहृतानीमानि प्रमाणानि-

**वाचा विरूप नित्यया ---॥**[2] **नित्ययाऽनित्यया स्तौमि ब्रह्म तत्परमं पदम् इति। श्रुतिर्वाव नित्या अनित्या वाव स्मृतयः याश्चान्या वाचः॥**[3] **विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः। अनादिनित्या सा तच्च विना तां न स गम्यते॥**[4] **सहस्रधा महिमानः सहस्रं यावद्ब्रह्मविष्ठितं तावती वाक्। कश्छन्दसां**

---

१ विष्णुतत्त्वविनिर्णयः

२ ऋङ्मन्त्रः

३ पैङ्गिश्रुतिः

४ कात्यायनश्रुतिः

**योगमावेद धीरः को धिष्ण्यां प्रति वाचं पपाद॥**[१] **नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः। सर्गे सर्गे अमुनैवैत उद्गीर्यन्ते तथैव च॥ तत्क्रमेणैव तैर्वर्णैस्तैः स्वरैरेव नान्यथा। अतः श्रुतित्वमेतासां श्रुता एव यतोऽखिलैः॥ जन्मान्तरे श्रुतास्तास्तु वासुदेवप्रसादतः। मुनीनां प्रतिभास्यन्ति भागेनैव न सर्वशः॥ यतस्ता हरिणा दृष्टा श्रुता एवापरैर्जनैः। श्रुतयो दृष्टयश्चेति तेनोच्यन्ते पुरातनैः तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु। चेतनस्य जनिर्यद्वदुच्यते सर्वलौकिकैः॥ पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु। क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत्॥ वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षया। अवान्तराभिमानानां देवानां वा व्यपेक्षया। नानित्यत्वात् कुतस्तेषाम् अनित्यत्वं स्थिरात्मनाम्॥** इति ब्रह्माण्डपुराणे[२]

**वेदास्ते नित्यविन्नत्वात् श्रुतयश्चाखिलैः श्रुतेः।**

**आम्नायोऽनन्यथापाठात् ईशबुद्धिस्थिताः सदा॥** इति महावराहे॥[३]

**वेदाः** - नित्यविद्यमानत्वात् ते वेदाः। **श्रुतयः** - अखिलैः श्रुतत्वात्। **आम्नायाः** - एकपाठात् वेदादिप्रमाणेषु वेदमन्त्रदर्शनविषयाः सन्ति दर्शनव्यवहारः नित्यत्वे एव युक्तः। सर्वज्ञत्वात् ईश्वरस्य तद्बुद्धौ सर्वदा प्रतीयमानत्वात्। न च प्रलयकाले वेदाः विनष्टाः भूत्वा सृष्टिकाले अन्ये एव वेदा सृज्यन्ते। पुराणेषु वेदाः सर्वेऽपि भगवद्बुद्धौ सदा प्रतीयमानाः भवन्ति इति उक्तम्। तद्बुद्धौ वेदाः सन्ति नाम तत्संस्कारोऽस्ति इति नहि वक्तव्यम्। पुराणेषु तदुत्पत्तिर्नाम सर्गे सर्गे पूर्वकल्पवत् उद्गीर्यमाणत्वमित्युक्तम्। अत एव भगवद्बुद्धौ वेदाः निरन्तरं प्रवहन्तः सन्तीत्येवेति ज्ञातव्यम्

**वेदानां प्रतिपाद्यम्**

यथोक्तं पूर्वमेव सदागमैकविज्ञेयः परमात्मा इति विशिष्टं तत्त्वं भवति माध्वमते। वेदानां प्रतिपाद्यनिर्णयः खलु प्रमाणेन भवेत्। तच्चोक्तं ब्रह्मसूत्रभाष्ये समन्वयाध्याये – "उक्तञ्च-बृहत्संहितायाम् –[४]उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये। इति- अपि च शब्दास्तावत् वृत्त्यर्थं बोधयन्ति। रूढियोगादयः वृत्तयः सन्ति । कया वृत्त्या सर्वे वेदाः परमात्मानमावेदयन्तीत्यत्र महायोगवृत्त्या, विद्वद्रूढ्या च भगवानेव सर्वशब्दाभिधेय इति समस्तेऽध्याये आनन्दमयाद्यधिकरणैः प्रत्यपादि भगवत्पादैः भाष्यकारैः । तदेतत्तु बहुविधैः प्रमाणैः विभिन्नसन्दर्भे प्रदर्शितमस्ति।

---

१ इति ऋग्वेदश्रुतिः

२ विष्णुतत्त्वविनिर्णयः

३ विष्णुतत्त्वविनिर्णयः

४ उपक्रमोपसंहारौ सुग्राह्यौ, अभ्यासो नाम – एकप्रकाराऽसकृदुक्तिः, प्रमाणान्तराप्राप्ता अपूर्वता, फलवत्वम् फलम् स्तुति-निन्दा-परकृति-पुराकल्पोऽर्थवादः, युक्तिरुपपत्तिः ।उत्तरोत्तरप्राबल्यविधया एते अर्थनिर्णायका भवन्ति ।

**सर्वे वेदाश्च नामानि तावा एता ऋचस्तथा।**

**इन्द्रं मित्रं च वरुणमित्याद्यत्र प्रमापरा॥**[१]

सर्वे वेदा यत्पदमामनन्ति इति कठश्रुतिः। नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परमम् उदाहरन्ति इति भाल्लवेयश्रुतिः। ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः एकैव व्याहृतिः इति ऐतरेयी श्रुतिः। इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥इति ऋग्वेदे॥[२] सर्वे वेदा श्रीहरिस्वरूपमेव प्रतिपादयन्ति, सर्वनामप्रतिपाद्यः स एव विष्णुः, सर्वध्वन्यात्मकवर्णात्मकशब्दाः एकस्यैव देवस्य व्याहृतिः स एव महाविष्णुः॥ इन्द्रादिशब्दवाच्य एक एव स एव विष्णुः द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥[३] ब्रह्मेति वेद उद्दिष्टः तस्माद् व्यक्तो यतो हरिः[४] सर्वज्ञं सर्वकर्तारं नारायणमनामयं सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि। सर्वेषामपि वेदानाम् इतिहासपुराणयोः प्रमाणानां च सर्वेषां तदर्थं चान्यदुच्यते।[५] इति॥ वेदैश्च सर्वैरहमेव वेद्यः---।[६] वासुदेवपरा योगा वासुदेवपराः मखाः। वासुदेवपरा वेदा वासुदेवपरा क्रियाः। वासुदेवपरं ज्ञानं वासुदेवपरं तपः। वासुदेवपरो धर्मो वासुदेवपरा गतिः॥[७] नारायणपरा वेदा देवा नारायणाङ्गजाः। नारायणपरा लोका नारायणपरा मखाः॥ नारायणपरो योगो नारायणपरं तपः। नारायणपरं ज्ञानं नारायणपरा गतिः ॥[८]

**वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः।**
**तावन्ति हरिनामानि कीर्तितानि न संशयः॥**[९]

**वेदादिवर्णपर्यन्तैर्मूर्तयः केशवस्य तु।**
**समासव्यासयोगेन वाच्यास्तात्पर्यतः क्वचित्।**
**यथायोग्यं यथान्यायम् अन्यासामपि मूर्तयः॥ ५३ ॥**[१०]

---

१ ऋग्भाष्यम्

२ भागवतम् १-१६४ -४६

३ ऋक्प्रातिशाख्यम् अ १

४ विष्णुतत्त्वविनिर्णयः

५ विष्णुतत्त्वविनिर्णयः

६ भगवद्गीता - १५ अध्याये

७ भागवतम् १-२-२८,२९

८ भागवतम् - २-५-१५,१६

९ तैत्तिरीयारण्यकस्य उपोद्घाते

१० ऋग्भाष्यम्

सर्वान् वेदानारभ्य सर्ववर्णपर्यन्तशब्दैः सङ्क्षेपेण विस्तारेण च परममुख्यवृत्त्या भगवन्मूर्तयो वाच्याः। संक्षेपविस्ताराभ्यां कथमिति एकेन वेदेन एका भगवन्मूर्तिः, द्वयेन द्वे त्रयेण तिस्रः, चतुर्भिः चतस्रः। एवम् अवान्तरशाखाभिरपि तावत्यो भगवन्मूर्तयो वाच्या इति ज्ञेयम्। तदपि योगवृत्तिं तत्तन्मूर्तीनां ज्ञापकलिङ्गमप्यनतिक्रम्य तावत्यो भगवन्मूर्तयो वाच्या इति च ज्ञेयम्। तथा लक्ष्म्यादयोऽपि सर्वविद्यावाच्या इति च ज्ञेयम्॥ पूर्वोक्तविचारेषु प्रमाणं श्रावयन्ति ऋक्संहितायामिति-

**ऋक्संहितायां स्वाध्याये निरुक्ते व्यासनिर्मिते ।**
**प्रवृत्ते चैतदखिलम् उक्तं हि प्रभुणा स्वयम् ॥ ५४ ॥**[१]

ऋक्संहितेति ग्रन्थे स्वाध्यायेति ग्रन्थे व्यासनिर्मिते निरुक्तग्रन्थे प्रवृत्तेति ग्रन्थे च एतत्सर्वं ज्ञायते॥ विष्णुरेव सर्वविद्यानां मुख्यप्रतिपाद्य इति श्रुतिभिः प्रदर्श्यते – एवं वेदानामुत्कृष्टमर्थं यो न जानाति व्यर्थमेव तस्य वेदाध्ययनमित्याह -

**स्थाणुरयं भारहारः किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम् ।**
**योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा ॥** इति ॥[२]

**डॉ. नारायणः**
असोसिएट् प्रोफेसर्, द्वैतवेदान्तविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
Gmail : nspm12@gmail.com
Mob. 9490077161

**सहायकग्रन्थसूची -**

*विष्णुतत्त्वनिर्णयः*, टीका. जयतीर्थः, वेङ्गलुरु : पूर्णप्रज्ञसंशोधनम्, 1935।

*ब्रह्मसूत्रम्*, व्याख्या. परमानन्दभारती, वाराणसी : चौखाम्बासंस्कृतप्रतिष्ठान, 1965।

*वृहदाण्यकोपनिषद्*, गोरक्षपुरः : गीताप्रेस, 1992।

*ऋक्प्रातिशाख्यम्*, अनु. वरेन्द्कुमारशर्मा, दिल्ली : चौखाम्बासंस्कृतप्रतिष्ठान, 1995।

*भगवद्गीता*, गोरक्षपुरः : गीताप्रेस, 2001।

*ऋग्वेदः*, सम्पा. रामगोविन्दशास्त्री, वाराणसी : चौखाम्बाविद्याभवन, २००७।

*कात्यायनश्रौतसूत्रम्*, सम्पा.विद्याधरशर्मा, वाराणसी : चौखाम्बासंस्कृतप्रतिष्ठान, २००५।

१ ऋग्भाष्यम्

२ ऋक्प्रातिशाख्यम् अ. १

अङ्क- ३४
जुलाई - दिसम्बर २०१९

**वेदविद्या**
ISSN-२२३०-८९६२
UGC 'CARE' list Sl.No. 97

# ऋग्वेदे वैदिकयज्ञानां प्रासङ्गिकता

**डॉ. गणेशप्रसादभट्टः**

**साक्षान्मूलप्रमाणाय विष्णोरमिततेजसे।**
**आद्याय सर्ववेदानां ऋग्वेदाय नमो नमः॥**

**ऋग्वेदः श्वेतवर्णस्यात् द्विभुजो रासभाननः।**
**अक्षमालाधरः सौम्यः प्रेतश्चाध्ययनेरतः॥**

ननु कोऽयं वेदो नाम ? के वा तस्य विषयप्रयोजनसम्बन्धाधिकारिणः कथं वा तस्य प्रामाण्यम् ? न खल्वेतस्मिन् सर्वस्मिन्नसति वेदो व्याख्यानयोग्यो भवति।

अत्र उच्यते - इष्टप्राप्तिः अनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः[1]। अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्त्येते। अनुभूयमानस्य स्त्रक् चन्दनवनितादेरिष्ट प्राप्तिहेतुत्वम् ? औषधादिः अनिष्टपरिहारहेतुत्वं च प्रत्यक्षतः सिद्धम्, स्वेनानुभविष्यमाणस्य पुरुषान्तरगतस्य च तथात्वमनुमानगम्यम्। एवं तर्हि भाविजन्मगतमप्यनुमानगम्यमिति चेत्, न तादृशस्य अनभिगमात्। न खलु ज्योतिष्टोमादिः इष्टप्राप्तिहेतुः, कलञ्जभक्षणवर्जनादिः अनिष्टपरिहारहेतुः इत्यमुमर्थं वेदयतिएकेणानुमानसहस्त्रेणापि तार्किकशिरोमणिः अपि अवगन्तुं शक्नोति, तस्मात् अलौकिकोपाय-बोधको वेद इति लक्षणस्य नातिव्याप्तिः। अत एवोक्तम् -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एनं विन्दन्ति वेदेन तस्माद् वेदस्य वेदता॥**[2] **इति**

स एवोपायो वेदस्य विषयः। तद् बोध एव प्रयोजनम्। ननु वेदोऽपि महाकवि कालिदासादि वाक्यवत् पौरुषेय एव ब्रह्मकार्यत्वश्रवणात्, यथा -

**तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।**
**छन्दासि जज्ञिरे तस्माद् यजुस्तमादजायत॥**[3]

इति श्रुतेः।

---

१ तै.भा.भू. पृ. २
२ वै.भा.भू.सं., पृ. २
३ ऋ. १०.९०.९

अत एव भगवान् बादरायणः "शास्त्रयोनित्वात्" इति सूत्रेण ब्रह्मणो वेदकारणत्वमवोचत् मा एवं श्रुतिस्मृतिभ्यां नित्यत्वावगमात्॥

**तस्मै नूनमभिद्यवे वाचा विरूप नित्यया।**
**वृष्णे चोदस्व सुष्टुतिम्** ॥ [१]

नानारूपैतन्नामक महर्षे त्वं प्रसिद्धाय अभिगततृप्तये वर्षकामायाग्नये उत्पत्तिरहिताय, मन्त्ररूपया, इदानीं चोदस्व। स्तुहीत्येवमृषिः स्वात्मानं ब्रवीति यजमानो वा होतारं विरूपम् - इति तत्रत्यं सायणभाष्यम्।

ननु वेदार्थाविबोधे विध्यभावात् बोधसाधनं व्याख्यानं व्यर्थमिति चेत्, न अध्ययनविधेर्बोधा-पर्यवसायित्वात् -

अध्ययनविधिश्चैषः -

**यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति।**
**यदीं श्रृणोत्यलकं श्रृणोति नहि प्रवेद सुकृतस्य पन्थाम्॥** इति[२]

"ऋच्यते स्तूयते यया सा ऋक्" अर्थात् यागकाले देवानां प्रशंसायां मन्त्रान् अनुच्चारयन् देवता आह्वयति यः सा होता नामको ऋत्विक् ऋग्वेदीयः भवति। ऋत्विक् कार्यार्थं सङ्कलिताः मन्त्राः स्तुतिरूपतया ऋचः समाख्याताः तेषां सङ्ग्रहः एव ऋग्वेदः।

**यज्ञः**

इज्यते देवपूजनं सङ्गर्तिदान च क्रियते यत्र स यज्ञः। यज्ञ शब्दः 'यज्' धातुभिः नङ् प्रत्ययं कृत्वा निष्पन्नो भवति। वेदानां गूढ फलमेव यज्ञाः, यज्ञानां निरुपणं धर्म सूत्रेषु, गृह्यसूत्रेषु, श्रौतसूत्रेषु च प्राप्यते। यज्ञानां एवं वेदानां प्रागाढसम्बन्धः कीदृशं अस्ति, एतद् अनेन ऋग्वेदीय ऋचया एव सुस्पष्टं भवति। यथा -

**अग्निमीळे पुरोहितं यज्ञस्यदेवमृत्विजम्।**
**होतारं रत्नधातमम्॥** [३]

मन्त्रेऽस्मिन् ऋग्वेदस्य देवता अग्निः यज्ञीय देवता, ऋत्विक् पुरोहितः, होता एवं रत्नधातमम् इत्यादिभिः विशेषणैः प्रयुज्य स्तवनं करोति। तत्र अध्वर इति शब्देनापि यज्ञस्य विशेषणं दत्तमस्ति। यज्ञः सर्वेषां देवानां एवं प्राणिनाम् आत्मा अस्ति। यज्ञेन यजमानाः प्रजाः पशवश्च समृद्धाः भवन्ति यज्ञः साफल्यतां न प्राप्नोति चेत् तेन यजमानस्य प्रजानां पशूनां च हानिः भवति। यथा -

---

१ ऋ. ८.७५.६

२ ऋ. १०.७१.०६

३ ऋ. १.१.१

**स इदस्तेव प्रति धादसिष्यञ्छिशीत तेजोऽयसो न धाराम्।**
**चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः॥** [१]

यज्ञाग्निं श्रद्धया प्रज्वालय एवं श्रद्धया हविषः आराहुतिः स्यात् तदा यजमानस्य मनः दृढसङ्कल्पित भूत्वा नानाविधऐश्वर्याः प्राप्तुं शक्यन्ते।

प्रदीप्ताग्नौ आहुता यथाविधि दातव्यतिः। मन्त्रेस्मिन् सम्यक् तया उल्लिखितं वर्तते। यथा -

**घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतम्वस्य मेदनम्।**
**घृतेनाहुत उर्विया वि प्रपथे सूर्य इव रोचते सर्पिरासुतिः॥** [२]

**त्वे धेनुः सुदुघा जातवेदोऽसश्चतेव समना सबर्धुक्।**
**त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रेभिरिध्यसे देवयद्भिः॥** [३]

धीरजनैः यज्ञेन वाक्तत्त्वस्य पन्थाः प्राप्तः। यज्ञे अग्नितत्त्वस्य प्रधानता भवति तेनैव जीवनी शक्तिं प्राप्तुं शक्यते। अतः एव यज्ञकर्म शारीरिकं मानसिकं तथा आध्यात्मिकशक्तीनां सम्पोषकः भवति। स एव यज्ञः पञ्चविधः अग्निहोत्रं, दशपूर्णामासौ, चातुर्मास्यानि, पशुः सोमेति। पञ्चभिः यज्ञैः श्रुतिः प्रतिपादितवैदिकयज्ञानां सम्पादनं भवति। यस्य स्पष्टोल्लेखः ऋग्वेदस्य दार्शनिकसूक्तेषु पुरुषसूक्त-नासदीयसूक्त-हिरण्यगर्भादिसूक्तेषु प्राप्यते।[४] विशिष्टद्रव्यैः युक्तेन मनसा, वाचा, कर्मणा यज्ञे विशेषाहुतिः दीयते चेत् तेन वातावरणे परिवर्तनं भवति।

**इयं वेदिः परो अन्तःपृथिव्या अयं यज्ञो भुवनस्य नाभिः।**
**अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम॥** [५]

यज्ञेन ऐश्वर्यं वर्धते यज्ञः मानवानां कृते समृद्धिकारकः च भवति यथा अधस्तनेषु मन्त्रेषु सम्यक् उक्तम्।

**यज्ञेन गातु मप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः।**
**अभिस्वरा निषदासा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत॥** [६]

**यज्ञोहित इन्द्रा वर्धनो भू दूतप्रियः सुत सोमो मियेधः।**
**यज्ञेनयज्ञमव यज्ञियः सन् यज्ञस्ते वज्रमहिहत्य आवत्॥** [७]

---

१ ऋ. ६.३.५

२ ऋ. १०.६.२

३ ऋ. १०.६९.८

४ ऋ. १०-९०/१०-१२१

५ ऋ. १६४.३५

६ ऋ. २.२१.५

७ ऋ. ३.३२.१२

यज्ञस्य उद्देश्यमेव उत्पत्तिः एवं रोगाणां विनाशार्थं भवति। यज्ञ एव पर्यावरणस्य महान् रक्षकः। यथा -

**आयुर्यज्ञेन कल्पताम्।**

अन्यच्च -

**मृत्योः पदं योपयन्तो यदैत द्राघीय आयुः प्रतरं दधानाः॥**[१]

यज्ञेन एव मानवानां आयुः वर्धते यज्ञेन एव बाह्यशुद्धिः अन्तश्शुद्धिश्च सम्भाव्यते। अत एव यज्ञ एव ईश्वरः यज्ञ एव विष्णुः।

इति श्रुति वाक्यम्

**यज्ञेशाच्युत गोविन्द माधवान्त केशव। कृष्ण विष्णो हृषीकेश वासुदेव नमोस्तुते॥**

**डॉ. गणेशप्रसादभट्टः**

एसो. प्रोफेसर्, ऋग्वेदविभागः

एस.वी. वैदिकविश्वविद्यालयः, तिरुपतिः

**सहायकग्रन्थसूची -**

*वेदभाष्यभूमिकासङ्ग्रहः*, सम्पा. वलदेवोपाध्याय, वाराणसी : चौखाम्बासंस्कृतसंस्थान, १९८५।

*ऋग्वेदः*, सम्पा. रामगोविन्दशास्त्री, वाराणसी : चौखाम्बाविद्याभवन, २००७।

मीमांसक, युधिष्ठिर. *श्रौतयज्ञमीमांसा*, हरियाणा : रामलालकपूरट्रस्ट, १९८७।

शर्मा, वेणीराम. *यज्ञमीमांसा*, दिल्ली : चौखाम्बाप्रकाश, १९९८।

शास्त्री, पट्टभिराम. *यज्ञतत्त्वप्रकाशः*, कोलकाता : मोतीलालपब्लिशर्स, १९८९।

१ ऋ. १०.१८.२

ISSN-२२३०-८९६२
UGC 'CARE' list Sl.No. 97

# षड्विंशब्राह्मणानुसारम् अलौकिककविज्ञानम्

**डॉ. रामराज उपाध्यायः**

इष्टप्राप्तयनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद[1] इत्यतिप्रसिद्धवचनेनानुसारेण वेदत्वं द्विविधम् इष्टदायकमनिष्टपरिहारकञ्च। जगत्यस्मिन् मानवानां प्रमुखमुद्देश्यमस्ति इष्टप्राप्तिः। परञ्चेष्टप्राप्तिः तदा एव भवितुं शक्यते यदा अनिष्टपरिहारो भवेत्। यतोहि इष्टप्राप्तये अनिष्टं बाधकम्। तर्हि इष्टप्राप्त्यर्थेनिष्टपरिहारः कर्त्तव्यः। परिहारस्याभावे इष्टप्राप्तिः सम्भावन्नास्ति। वेदेषु इष्टप्राप्तियनिष्टपरिहारयोरलौकिकमुपायं वर्णितमस्ति। लौकिकमुपायं तु जनाः स्वीयेन परिश्रमेण कुर्वन्ति परञ्चालौकिकमुपायं वेदे एव प्राप्यते। अतः वेदेष्वलौकिकमुपायमलौकिकविज्ञानमस्ति। मन्त्रब्राह्मणयोर्वेदनामधेयमिति रीत्या मन्त्रसंहिताः ब्राह्मणाग्रन्थाश्चवेदे स्वीक्रियन्ते। मन्त्रसंहिताषु ऋग्यजुस्सामाथर्वसंहिताश्चप्राप्यन्ते। सर्वेषां वेदानां ब्राह्मणग्रन्थाः भिन्ना-भिन्नाः।

षड्विंशब्राह्मणग्रन्थः सामवेदस्य ब्राह्मणग्रन्थोऽस्ति। अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिममित्यनुसारेण सामवेदस्याष्टौ ब्राह्मणग्रन्थास्सन्ति। तेषु ब्राह्मणग्रन्थेषु प्रथमं ब्रह्मणं ताण्ड्यमहाब्राह्मणमस्ति। द्वितीयं ब्राह्मणं षड्विंशब्राह्मणमस्ति। षड्विंशब्राह्मणस्यानुसारेणालौकिक-विज्ञानस्य ज्ञानमेवं प्रकारेण कर्त्तुं शक्यते। षड्विंशब्राह्मणे अलौकिकं विज्ञानं द्विधा प्राप्यते। इष्टप्राप्तिसंज्ञकमलौकिकं विज्ञानम् अनिष्टपरिहारकमलौकिकं विज्ञानञ्च।

षड्विंशब्राह्मणे षट् अध्यायास्सान्ति। प्रथमे, द्वितीये, पञ्चमे चाध्याये सप्त-सप्त खण्डाः, तृतीयेऽध्याये नव, चतुर्थेऽध्याये षट्, षष्ठे चाध्याये द्वादश खण्डाश्च सन्ति। ग्रन्थेऽस्मिन् अनिष्टपरिहाराणां चर्चा षष्ठाध्याये प्राप्यते। षष्ठाध्यायस्यारम्भे प्रथमखण्डस्य प्रथमसूत्रस्य व्याख्यानावसरे तत्र लिख्यते - अथ[2] इष्टप्राप्तिसाधनकर्मनिरूपणानन्तरमनिष्टपरिहारसाधनकर्म-निरूपणस्य प्रस्तुतत्वादद्भुतानां दैविकानाम् अनिष्टप्राप्तिसूचकानां कर्मणां तत्सूचितदोषनिर्हरण-साधनात्मिकां शान्तिं व्याख्यास्यामः।

उक्तेन व्याख्यानेनेदं स्पष्टं भवति यत् षड्विंशब्राह्मणस्य पञ्चस्वध्यायेषु इष्टप्राप्त्युपायानां चर्चा अस्ति। षष्ठाध्याये अनिष्टपरिहाराणां चर्चा क्रियते। इष्टप्राप्त्युपायानामन्तरमनिष्टपरिहाराणां चर्चैवं संसूचयति अनिष्टपरिहाराणामनन्तरमेव इष्टप्राप्तिर्भविष्यति। इदमेवानुसृत्य पौरोहित्ये गणेशं पूजयेदादौ इति लिखितमस्ति। अनिष्टपरिहारार्थमुपायानां नाम अद्भुतशान्तिरस्ति। अत्रः प्राप्यते - अथातोऽद्भुतानां कर्मणां शान्तिं व्याख्यास्यामः।

---

१ वेद भा.यू.सू. पृ. २

२ ष.वि.ब्रा. ६.१.१

सूत्रमस्ति– [१]**पालाशानां समिधामष्टसहस्रं जुहुयात्।** अत्र एवं स्पष्टं जातं पालाशे अनिष्ट-परिहारकत्वमस्ति। पालाशसमिधायाः प्रयोगः पौरोहित्यस्य कृते नूतननास्ति। यज्ञोपवीतसंस्कार-प्रकरणेऽपि [२]**पालाशो ब्राह्मणस्य दण्डः** इति लिखितमस्ति। पलाशवृक्षोद्भवस्य दण्डस्य प्रदानं वटुकस्य कृते प्रदीयते येन निर्विघ्नतया ब्रह्मचारी स्नातको भवेत्। अत्राश्चर्यं प्रतीयते पालाशदण्डधारणेन स ब्रह्मचारी स्वोद्देशस्य पूर्तिं करोति। अत्र वैज्ञानिकदृष्ट्या किञ्चित् विचार्यते। विज्ञाने प्रायशः द्विविधानां द्व्याधिकानां वा वस्तूनां सम्मेलनं कार्यते। येन किञ्चिदपरं निर्मितं भवति। यथा जलस्य निर्माणे हाइड्रोजनऑक्सीजन इत्युभयोः मेलनं भवति। सुविज्ञातमस्ति - $H_2$ + O – $H_2O$ (जलम्)। अत्रैका अभिक्रिया अभवत्। यया अभिक्रियया परिणामः आगतः। प्रकारेणानेन पालाशदण्ड-धारणेन दण्डस्य हस्तस्य चोभयोर्मध्ये दीर्घस्पर्शो जातः। यस्य प्रभावः तन्त्रिकातन्त्रमाध्यमेन मस्तिष्कोपर्यभवत्। येन स्वकार्यसाधने तस्य प्रवृत्तिः बलयुक्ता अभवत्। अतः अत्र अलौकिकत्वं दृश्यते। यतोहि अर्कः पलाशः खदिरः इत्यनेन पौरोहित्ये सोमस्य कृते पलाशदण्डः निर्धारितः। अर्थात् सोमस्य लक्षणं पलाशे विद्यते। लक्षणसाम्यवशात् कृतेनोपक्रमेण सोमस्य प्रीतिर्भवति। सामान्यरूपेण यथा भवन्तः वस्त्रधारणं करोति तथैव अन्यस्य तदा आकर्षणं जायते। अनेन अलौकिकत्वमुत्पद्यते।

अस्मिन् ब्राह्मणग्रन्थे लिखितमस्ति पालाशसमिद्भिः अष्टसहस्रम् अष्टोत्तरसहस्रं जुहुयात्। पौरोहित्ये हवनस्य विधानम् अष्टोत्तरसहस्रम् अष्टोत्तरशतम् अष्टाविंशतिम् अष्टौ वा जुहुयादिति लिखितमस्ति। अत्र विचार्यते कथं जुहुयादित्यस्य समाधाने प्राप्यते- [३]**एन्द्र-याम्य-वारुण-धानद-आग्नेय-वायव्य-सौम्य-वैष्णव्येत्यष्टौ।** सूत्रस्यास्य परिभाषायां तत्र प्राप्यते ऐन्द्रः इन्द्रादिदेवताः सर्वेऽपि देवतावाचकाः शब्दाः। ऐन्द्रादयो वैष्णव्यान्ता अष्टावृचः। ताभिर्जुहुयात्। अत्र इन्द्रस्य कृते [४]इन्द्रायेन्दो मरुत्वते, याम्यस्य कृते [५]**नाके सुपर्णमुप यत्पतन्तम्,** वरुणस्य कृते [६]**घृतवती भुवनानां**, धनदस्य कृत् [७]**अभि त्यं देवं सवितारमोण्योः**, आग्नेयस्य कृते [८]**अग्निं दूतं वृणीमहे**, वायव्यस्य कृते [९]**वात आ वातु भेषजम्,** सौम्यस्य कृते [१०]**सोमं राजानं वरुणम्,** वैष्णवस्य कृते [११]**इदं विष्णुर्विचक्रमे** इति।

१ ष.वि.ब्रा. ६.१.२
२ पा.गृ.सू. २.५.२५
३ ष.वि.ब्रा. ६.१.३
४ सा. ४६२
५ सा. ३२०
६ सा. ३७८
७ सा. ४६४
८ सा. ३.
९ सा. १८४
१० सा. ९१
११ सा. २२२

अत्र हवनस्य विधानं वर्णितमस्ति। अलौकिकविज्ञानस्याप्रतिममुदाहरणमस्ति हवनम्। अस्मिन् आहुतिः अग्नौ गच्छति परञ्च देवाः प्राप्नुवन्ति। कथम् ? इत्यस्य विनिवारणे सर्वे जानन्ति अग्निर्वै देवानां मुखम्। अग्निं दूतं वृणिमहे इत्यस्मिन् मन्त्रे देवानां दौत्ये विनियुक्तं दूतमिति लिखितमस्ति। हवनीयपदार्थानां प्रेषणस्य कार्यमग्निः करोति। यज्ञस्य परिभाषायां प्राप्यते -

[1]**देवानां द्रव्यहविषां ऋक्सामयजुषां तथा।**

**ऋत्विजां दक्षिणानां च संयोगो यज्ञ उच्यते॥**

अत्र संयोगः शब्दः लिखितमस्ति। वैज्ञानिकाभिक्रियायां संयोगः मुख्यः। संयोगे पदार्थानां मध्ये अभिक्रिया भवति। अत्र संयोगः केवलं पदार्थानां न अपितु अपदार्थानामपि विद्यते। पदार्थापदार्थयोः अभिक्रियाभ्यां फलमलौकिके विज्ञाने प्राप्यते।

अत्र हवनातिरिक्तं जपस्यापि विधानमस्ति। [2]एतानि सामप्रभृत्यष्टशतं जप्त्वा स्वस्ति वाचयित्वा स्वस्ति हैषां भवति। एतानि मन्त्रवाक्यानि सामप्रभृति सामगानपुरःसरम् अष्टशतम् अष्टोत्तरशतं प्रत्येकं जप्त्वा स्वस्ति वाचयित्वा पुण्याहवाचनं कुर्यादिति। तथा च सति एषां यजमानानां स्वस्ति अनिष्टपरिहारद्वारेण मङ्गलं भवत्येव। स्वस्तिवाचनमन्त्राणां प्रतीकप्रदर्शनमीत्थं प्राप्यते। **स्वस्तिदा विशस्पतिः**[3], **स्वस्त्ययेन तार्क्ष्यमिहा हुवेम**[4], **त्यमूषु वाजिनं देवजूतम्**[5], **आयुर्विश्वायुः**[6], **शतं जीव शरदो वर्धमान**[7] इति।

अत्र जपे अलौकिकं विज्ञानं दृश्यते। मन्त्राणामुच्चारणेन ध्वनिः निस्सार्यते। अस्य सम्बन्धः ध्वनिविज्ञानेन सह वर्तते। शब्दानामुच्चारणे यत्नः क्रियते। यत्नो [8]द्विधा आभ्यन्तरो बाह्यश्च। आद्यः पञ्चधा स्पृष्टेषत्स्पृष्टेषद्विवृतविवृत्संवृतभेदात्। स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तस्थानीम्, ईषद्विवृतमुष्मणां विवृतं स्वराणाम्। बाह्यप्रयत्नस्त्वेकादशधा। इत्थं बहुप्रकारेण प्रयत्नेनोद्भूतो ध्वनिः पर्यावरणं शुद्धं करोति। पौरोहित्ये आगमनार्थं तु [9]देवानां गमनार्थं तु रक्षसाम्। ..... घण्टानादः करोम्यहमिति लिखितमस्ति। अत्र देवानामागमनार्थं रक्षसां गमनार्थं च घण्टानादं क्रियते। देवानामागमनमस्ति दिव्यशक्तीनामागमनं रक्षसां गमनमस्ति दुर्वृत्तीनां गमनम्। कस्यापि

१ मत्स्यपुराणे १४४.४४

२ ष.वि.ब्रा. ६.१.५

३ ऋ.वे. १०.१५२.२

४ ऋ.वे. खि.२.४.१

५ ऋ.वे. १०.१७८.१

६ ऋ.वे. १०.१७.४

७ ऋ.वे. १०.१६१.४

८ लघुसिद्धान्तकौमुद्याम् - संज्ञाप्रकरणे।

९ हनुमद्यागपद्धतौ - घाण्टापूजनप्रकरणे।

पर्यावरणस्य शुद्धये दिव्यशक्तीनां प्रभावो भवेदिति पौरोहित्यिकाः मन्यन्ते। अतः मन्त्राणामुच्चारणं विधिपुरस्सरं क्रियते। कार्यक्रमस्यादौ वैदिकमङ्गलाचारणास्य विधानं दृश्यते। तत्र अलौकिकत्वं किमस्ति ? वेदमन्त्रोच्चारणेन तस्मिन् कार्यक्रमे उपस्थितानां दुर्वृत्तीनां निर्गमनं सुवृत्तीनामागमनं च भवति। तेन स कार्यक्रमः स्वकीयस्योद्देशस्य पूर्तिं करोति। अत्र अलौकिकविज्ञानरूपेण ध्वनिविज्ञानं प्राप्यते।

स्वास्थ्यताप्राप्तये अपि अलौकिकत्वं प्राप्यते। [१]**अथ यदास्य प्रजायां पशुषु शरीरे वाऽरिष्टानि प्रादुर्भवन्ति। व्याधयो वा अनेकविधा अतिस्वप्नमस्वप्नमतिभोजनमभोजनमालस्यं** - व्रणमजीर्णनिद्रा जागरणानीत्येवमादीनि। तान्येतानि सर्वाणि यमदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति। सूत्रस्यास्य भाष्ये प्राप्यते यदास्य पुरुषस्य सम्बन्धिषु प्रजया पुत्रादिकया सहितेषु पशुषु पश्वादिषु स्वशरीरे वारिष्टानि पीडाः प्रादुर्भवन्ति, अतिस्वप्नं दुःस्वप्नं दृश्येत। अस्वप्नम् अनिद्रा। अतिभोजनं भस्मकरोगवशेन बहुतराभ्यव्यवहारः। अभोजनम् अरुच्यादिना, आलस्यं वृथालसता, व्रणं शस्त्रादिना ग्रन्थ्यादिना वा। अजीर्णं क्षुदभावेन भुक्तस्याहारस्याजरणम् निद्रा अतिनिद्रा च। इत्येवमादीनि नेत्रादिदोषाः, तान्येतानि सर्वाणि यमदैवत्यानि अद्भुतानि प्रायश्चित्तानि प्रायश्चित्त-निमित्तानि भवन्ति।

उक्तानां दोषाणां निवारणार्थं [२]**नाके सुपर्ण** इति [३]**स्थालीपाकं हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोति, यमाय स्वाहा, प्रेताधिपतये स्वाहा, दण्डपाणये स्वाहा, ईश्वराय स्वाहा, सर्वपापशमनाय स्वाहा** इति व्याहृतिभिर्हुत्वथ साम गायेत्।

उपर्युक्तेषु वाक्येष्वेवं प्राप्यते रोगाणां विनिवारणे नाके सुपर्ण इति मन्त्रस्य गानपूर्वकमुच्चारणं क्रियते एवं मन्त्रोच्चारणपूर्वकं हवनादिकं क्रियते। प्रायशः जना अनुचरन्ति यदि निद्रा नागच्छति तर्हि शयनस्य गोलिकां नीत्वा शयनं कुर्वन्ति परञ्च यस्मिन् काले गोलिकाया आविष्कारं नासीत् तस्मिन् काले किं सम्भाव्यते ? तस्मिन् काले मन्त्रमाध्यमेन उपचारप्रक्रियायाः ज्ञानमासीदिति मन्ये। इदानीं जनाः गोलिकारूपेण औषधिसेवनं कुर्वन्ति। परञ्चेयमाङ्ग्लगोलिका प्रतिक्रियामपि करोति। तस्मिन् क्षणे तु निद्रा आगच्छति परञ्च अग्रे दुष्प्रभावोऽपि भवितुं शक्यते।

मन्त्राणामुपचारविधाने एवं मन्यते तस्य प्रयोगस्य किञ्चिदपि दुष्प्रभावो न भवति। अत्र विज्ञानमति शरीरस्य सर्वेषामीन्द्रियाणां सम्बद्धाः देवाः भवन्ति। ते देवा यदा यदा प्रसन्नाः भवन्ति तदा शरीरं स्वस्थः भवति। ते यदा अप्रसन्नाः भवन्ति तदा शरीरम् अस्वस्थ्यं भवति। देवानां प्रसन्नकरणार्थमुपायेषूत्कृष्टतम उपायोऽस्ति मन्त्राणामुच्चारणम्। यतोहि -

---

१ ष.वि.ब्रा. ६.४.२

२ सा. ३२०

३ ष.वि.ब्रा. ६.४.३

**दैवाधीनं जगत्सर्वं मन्त्राधीना तु देवता।**
**ते मन्त्रा ब्राह्मणाधीना तस्माद् ब्राह्मणदेवता॥**

यदा सम्बद्धमन्त्राणामुच्चारणां क्रियते तदा स देवः प्रसन्नो भूत्वा स्वकीयम् इन्द्रियं सम्यक्तया सञ्चालयति। अतः अत्र प्रत्यक्षतया अलौकिकत्वं दृश्यते।

निमित्तविशेषप्रायश्चित्तेऽपि विज्ञानस्य दर्शनमीत्थं भवति। अथ यदास्य कनकरजतवरवस्त्र-वज्रवैडूर्यमुक्तामणिवियोगो भवति। आरम्भा वा विपद्यन्ते। अथवा अन्यानि क्रूराणि मित्राणि वा विराजन्ते। अरिष्टानि वा वयांसि गृहमध्यासते। वाल्मीकभौमानि वा जयन्ते। छत्राकं वोपजायते। मधूनि वा निलीयन्ते। इत्येवमादीनि। तान्येतानि सर्वाणि वैंश्रवणदैवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।

अस्य व्याख्यायां प्राप्यते यदा कनकादिभ्यो वियोगो भवति अथवा आरम्भ उद्येगा विपद्यन्ते अथवा अन्यानि क्रूराणि पिशाचादिदर्शनानि अपि वा मित्राणि सुहृदो विराज्न्ते विद्विषन्ति, अरिष्टानि दुःखसूचकानि वयांसि काकादीनि स्वगृहमध्यासते। बाल्मीकभौमानि भूमौ भवानि प्राणिजातानि जयन्ते प्रादुर्भवन्ति अथवा छत्राकं सिलिगृह उपदृश्यते अथवा मधूनि सरघा वाभिनिलीयन्ते स्वगृहे। एवमादीनि तान्येतानि सर्वाणि अन्यान्यपि अद्भुतानि वैश्रवणदैवत्यानि कौबेराणि प्रायश्चित्तानि प्रायश्चित्तनिमित्तानि भवन्ति। अस्य कर्त्तव्यता उच्यते - [1]अभित्यं देवम् इति स्थालीपाकं हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोति। वैश्रवणाय स्वाहा, यक्षाधिपतये स्वाहा, हिरण्यपाणये स्वाहा, ईश्वराय स्वाहा, सर्वपापप्रशमनाय स्वाहा इति व्याहृतिभिर्हुत्वाथ साम गायेत्।

अत्र दुःखोद्भवे काले सुखस्य व्याप्तिः कथं भवेदिति चिन्तनं कृतम्। अभित्यमित्यनेन मन्त्रेण हवनं कृत्वा मन्त्रस्यास्य गायनं वियोगजनितदुःखापहारकं भवति।

**डॉ. रामराज उपाध्यायः**
वेदपौरोहित्यविभागः

**सहायकग्रन्थसूची -**

*षड्विंब्राह्मणम् (ष.वि.ब्रा.)* सम्पा. नित्याग्निहोत्री, कुम्भघोणम् : जि.दी.पु. समिति, १९८२ ।

*पारस्करगृह्यसूत्रम् (पा.गृ.सू.)* सम्पा. सुधाकरपाण्डेयः, दिल्ली : चौखाम्बाप्रकाशन, २०१८।

*मत्सपुराणम्,* सम्पा. श्रद्धाशुक्ला, दिल्ली : नागपब्लिकेशन, २००४।

*ऋग्वेदः,* सम्पा. रामगोविन्दशास्त्री, वाराणसी : चौखाम्बाविद्याभवन, २००७।

*वेदभाष्यभूमिकासंग्रहः,* सम्पा. वलदेवोपाध्याय, वाराणसी : चौखाम्बासंस्कृतसंस्थान, १९८५।

१ सा. ४६४

अङ्क- ३४
जुलाई - दिसम्बर २०१९

**वेदविद्या**
ISSN-२२३०-८९६२
UGC 'CARE' list Sl.No. 97

# ज्योतिषोक्तकालोपाधीनां वेदमूलत्वम्

**डॉ. सुरेशशर्मा**

भारतीयानां ज्ञानागाराः वेदाः सन्ति। सर्वेषामेव ज्ञानानां विद्यानाञ्च मूलं वेदेषु वर्णितं विद्यते। ज्योतिषशास्त्रस्यास्तित्वं वैदिकमन्त्रेषु सर्वप्रथमं विकीर्णरूपेण प्राप्यते। वेदेषु ग्रहनक्षत्रादीनां चर्चा प्रकीर्णरूपेण प्राण्यते। तत्र सूर्यादिग्रहाणां ध्रुवागस्त्यसप्तर्ष्यादितारकानां च देवत्वरूपे स्तुतिपरक-मन्त्राः प्राप्यन्ते। संहिताब्राह्मणग्रन्थेषु न केवलं ग्रहनक्षत्राणां प्रति देवत्वभावो दृश्यते, अपितु तस्मिन् काले ग्रहादीनां स्वरूप-गुण-प्रभावस्यापि विचारः प्रारब्ध आसीत्। वैदिकयज्ञसम्पादनार्थं वर्षायनर्तुमासपक्षादीनां विचारो भवति स्म। येनैतज्ज्ञायते यत्तदापि शास्त्रेऽस्मिन् मानवीयज्ञानं समृद्धमासीत्। तत्र गगनमण्डले सूर्यचन्द्रादिग्रहाणां नक्षत्राणां तारकाणां ऋतूनां मासानां दिवसानाञ्च यथावसरं चमत्कारिकं वर्णनं समुपलभ्यते।

ज्योतिषशास्त्रानुसारेण कालस्य नवभेदाः सन्ति। तद्यथा सूर्यसिद्धान्ते -

**ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।**
**सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव॥**

सिद्धान्तदृष्ट्या विचार्यते चेत् कालस्य कल्प-युग-सम्वत्सर-वर्ष-अयन-मास-पक्ष-दिनादयः प्रमुखा अवयवाः सन्ति। ऐतेषां सर्वेषां भेदानामाधारः वेदाः एव सन्ति। वैदिकऋक्षु स्थाने स्थाने कालस्य चर्चा प्राप्यते।

ज्योतिषस्य त्रयो भेदाः संक्षेपेण ग्रहाणा गतिस्थितिसम्बन्धितगणितम् अर्थात् कः ग्रहः अस्मिन् सभागे कस्मिन् स्थाने कस्मात् स्थानात् दृश्यते इति गणितं संहिता-स्कन्धे विषयः तस्य ग्रहस्य इष्टस्थानात् अभीष्टकाले मानवजीवनोपरि कः प्रभावः भविष्यतिति ज्ञानं येन स्कन्धेन भवति घेरास्कन्धः तथा तस्य इष्टस्थानात् स्पष्टग्रहस्य स्मष्टिगतप्रभावविवेचनम् अर्थात् तत् स्थानोपरि भूखण्डोपरि ग्रामोपरि नगरोपरि कः प्रभावः भविष्यति इति विषयः संहितास्कन्दस्य अतः स्कन्धत्रयाणां मूल्य-कतिमगाति कालज्ञापकशास्त्रामिदं वर्तते। कालस्य कथमिति विचारः अथः विधीयते।

**वेदे कल्पशब्दः**

सम्प्रति पुराणेषु ज्योतिषशास्त्रेषु च ब्रह्मणो दिनबोधकः कल्पशब्दो यादृशमर्थं व्यनक्ति स वैदिकसाहित्ये नोपलभ्यते। तैत्तिरीयारण्यके कल्पशब्दस्य प्रयोगः कल्पसूत्रार्थे विद्यते। विष्णुपुराणे सहस्त्रयुगानां वेधसो दिनं कल्पशब्देनोच्यते। ब्रह्मणो शतवर्षात्मकमायुषो मानमेव महाकल्पशब्देनाभिधीयते।

**वेदे युगविचारः**

ऋग्वेदे कालमानस्य द्योतकत्वेन युगस्य प्रयोगो बहुलतया दृश्यते। कृतादियुगानां विषयेऽपि वेदेषु बहुचर्चितम् -

**तदूचुषे मानुषेमा युगानि कीर्तेन्यं मधवा नाम विभ्रत्।**

अस्य मन्त्रस्य व्याख्यां कुर्वन् सायणाचार्येण लिखितं यत् -

**मनुष्याणां सम्बन्धीनि इमानि दृश्यमानानि युगानि अहोरात्रसंघनिष्पाद्यानि कृतत्रेतादीनि सूर्यात्मना निष्पादयतीति शेषः।**[1] मन्त्रेऽस्मिन् सायणाचार्येण युगशब्दस्यार्थः कृतादिचतुर्युगमेव स्वीकृतम्। अनेन ज्ञायते, यद् वैदिककाले कृतादियुगानां प्रचार आसीत्। ऋग्वेदस्यैकस्मिन् मन्त्रे युगशब्दस्य प्रयोगोऽनेन प्रकारेण भ्यते -

**दीर्घतमा मामतेयो जुजुवान् दशमे युगे।**[2]

मन्त्रेऽस्मिन् एकाख्यायिका समायाति यस्यामुक्तं यत् ममतायाः पुत्रः दीर्घतमानामकः ऋषिः अश्विनः प्रभावेण स्वदुःखेभ्यो निवृत्य स्त्रीपुत्रादिबान्धवैः सह दशयुगपर्यन्तं सुखेनावसत्।[3] अत्र 'दशमे युगे' इदं विचारणीयमस्ति। वेदाङ्गकाले पञ्चवर्षाणां युगस्योल्लेखः प्राप्यते। अतोऽत्रानेन मन्त्रेण ज्ञायते यदस्या आख्यायिकायः प्रयोगानन्तरं दीर्घतमा ऋषिः दशयुगपर्यन्तं (१०×५=५०) पञ्चाशद्वर्षपर्यन्तं सुखेनातिष्ठत्। ऋग्वेदस्यान्यस्मिन् मन्त्रे युगशब्दस्यार्थः कालस्य तथाहोरात्रस्य कृतेऽभवत्। यथा हि तत्र - 'नहुषा युगा मन्हारजांसि दीयथः।[4] मन्त्रभागेऽस्मिन् युगशब्दस्यार्थः 'युगोपलक्षितान् कालान् प्रसरादिवसान् अहोरात्रदिकालान् वा' कृतोऽस्ति। अनेनेदं स्पष्टं यत् वैदिककाले वैदिकवाङ्मये युगाब्दस्यार्थोऽहोरात्रकालयोरर्थे प्रयुक्तोऽस्ति। ऋग्वेदस्य षष्ठमण्डले 'युगे-युगे' इत्यस्य पदस्यार्थः 'काले-काले' इति विहितम्। वाजसनेयिसंहितायाः द्वादशस्याध्यायस्य

---

१ भा. ज्यो. पृ. सं. ५३

२ ऋ. सं. १.१५८.६

३ भा. ज्यो. पृ. सं. ५३

४ भा. ज्यो. पृ. सं. ५४

दशमितायां कण्डिकायां 'दैव्यं मानुषा युगा' इति पदेन सिद्ध्यति यत्संहिताकाले देवमनुष्यौ द्वौ युगौ प्रचलितावास्ताम्।[१]

**'या औषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा'।**

अत्र 'त्रियुगम्' इत्यस्य शब्दस्य कृतादियुगत्रयमथवा वसन्तवर्षाशरदिति ऋतुत्रयमित्यर्थं स्वीकृतवान् सायणाचार्यः। एतेन निष्कर्षोऽयं निःसरति यद् युगमानमयुतादधिकं मन्यते स्म। 'किन्त्वयं निष्कर्षोऽधिकः निश्चितो नैव विद्यते' इति मैक्डानल-कीथमहाशययोर्विचारः। युगशब्दस्यैतादृशेषूल्लेखेषु क्वचिदपि तस्य स्पष्टः कालमानो न निश्चीयते।[२] वेदाङ्गज्योतिषकालिकपञ्चसंवत्सरात्मकं युगमिदमेव विद्यत इत्यपि स्पष्टं नास्ति। परञ्च दीर्घकालावबोधाय वेदे युगशब्दस्य प्रयोगोऽभूदिति तु सुनिश्चितम्।

**वर्षविचारः**

ऋग्वेदे वर्षस्य कृते शरद्हेमन्तशब्दयोः प्रयोगोऽभूत्। यतो हि शरदतोरनन्तरं पुनः शरदर्तुः, हेमन्तर्तोरनन्तरं पुनः हेमन्तर्तुः वर्षानन्तरं समायाति। अतः अनयोः प्रयोगः संवत्सरस्य कृतेऽभवत्। गोपथब्राह्मणे वर्षस्य कृतेऽयनशब्दस्य प्रयोगोऽभवत्। वाजसनेयिसंहितायां वर्षस्य कृते 'समा' इति शब्दस्य प्रयोगः कृतोऽस्ति। ऋग्वेदस्य दशममण्डले 'समानां मास आकृतिः' वाक्येऽस्मिन् समाशब्दस्य प्रयोगो वर्षस्य कृतेऽभवत्। शतपथब्राह्मणे संवत्सरव्युत्पत्तिविषये प्रोक्तम् -

**ऋतुभिर्हि संवत्सरः शक्नोति स्थातुम्।**

अर्थात् 'संवसन्ति ऋतवः यत्र' तदेव संवत्सरमित्युच्यते। ऋतुषु वसन्तस्य प्रथमोल्लेखदर्शनात् तत एव सौरवर्षस्यारम्भो भवति। अर्थान्मधुमासस्यारम्भत एव संवत्सराम्भः।[३]

**अयनविचारः**

वैदिकसाहित्ये अयनविषयेऽपि बहुप्रयुक्तं दृश्यते। वैदिकवाङ्मये अयनशब्दस्य प्रयोगः प्राचीनतमे ऋग्वेदेऽप्युपलब्धो भवति। शतपथब्राह्मणे अयनशब्दस्य प्रयोग उत्तरदक्षिणायनयोः कृतेऽभूत् -

**वसन्तो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद्हेमन्तःशिशिरास्ते पितरो.....। स यत्रोद्गावर्तते देवेषु तर्हि भवति....। अथ यत्र दक्षिणावर्तते। पितृषु तर्हि भवति।**[४]

१ भा. ज्यो. पृ. सं. ५४

२ भगणसमीक्षा पृ. सं. ५

३ भगणसमीक्षा पृ. सं. ५

४ भा. ज्यो. पृ. सं. ५२

अनेन प्रकारेण वसन्तग्रीष्मवर्षा इमाः तिस्र ऋतवः देवसंज्ञकाः, शरद्हेमन्तशिशिरश्च पितृसंज्ञकाः। सूर्यस्योत्तराभिमुखं गमनमुत्तरायणं दक्षिणाभिमुखञ्च गमनं दक्षिणायनं भवति। इत्थं वसन्तग्रीष्मवर्षासु देवभागे शरद्हेमन्तशिशिरेषु च पितृभागे सूर्यस्यावस्थितिवशात् शङ्करबालकृष्ण-दीक्षितमहोदयैः शतपथब्राह्मणस्योपर्युक्तवाक्ये 'उदगावर्तते' 'दक्षिणावर्तते' इत्यनेन विषुववृत्तादुदग्दिशि दक्षिणदिशि च गच्छतीत्यर्थं समामनीतम्। तैत्तिरीयसंहितायामुक्तं यत् सूर्यः षण्मासपर्यन्तं दक्षिणतः गच्छति षण्मासपर्यन्तमुत्तरतः गच्छति। उक्तञ्च तत्र -

**तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेण।** [१]

अत्र स्पष्टरूपेण सूर्यस्य गतेः स्थितेश्च वर्णनं प्राप्यते। यदि सौम्यगोल एवोत्तारायणं याम्यगोलश्च दक्षिणायनमिति व्याख्या स्वीक्रियते तदा वेदपुराणयोरेकवाक्यता सिद्धयति। ज्योतिषशास्त्रदृष्ट्या तु गोलायनयोर्भेदो मन्यते। मकरतो मिथुनान्तं यावत् उत्तरायणं, कर्कतो धन्वन्तं यावद्दक्षिणायनं भवति। मेषादिराशिषट्के स्थिते सूर्ये उत्तरगोलो भवति। कन्याराशिषट्के स्थिते च सूर्ये दक्षिणगोलो भवति।

**ऋतुविचारः**

वैदिकसाहित्यस्य परिशीलनेनर्तुसंख्या षडेवास्तीति निश्चेतुं शक्यते। तैत्तिरीयसंहितायामुक्तम् -

**मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू।** [२]

ऋतुमधिकृत्य वैदिकसाहित्ये यत्र-कुत्रचित् हेमन्तशिशिरयोः समासेन पञ्चैवर्तवः प्रोक्ताः। यथा -

**द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन।** [३]

ऋग्वेदे प्रायः ऋतुत्रयस्योल्लेख एव प्राप्यते। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्म शरद्हविः। वसन्तस्य मुख्यत्वेऽपि पृथग्विधानं तैत्तिरीयब्राह्मणे लभ्यते - 'मुखं वा एतदर्तूनां तद्वसन्तः।' तत्रैव संवत्सरो पक्षित्वेनोपवर्णितः। यस्य वसन्तो हि शिरः, ग्रीष्मो दक्षिणपक्षः, शरद् उत्तरपक्षः, वर्षा पुच्छः, हेमन्तो मध्यमिति। ऋतुस्थितेः सूर्यावलम्बत्वेन् सौरमासतिथीनामनिश्चयेन च कस्यर्तोः कदारम्भो भवतीति दुष्करमेव वक्तुं शक्यते।

---

१ तै. सं. ६.५.३

२ तै. सं. ४.४.११

३ भा. ज्यो. पृ. ५०

**मासविचारः**

वर्षस्य द्वादशविभागात्मकस्य मासशब्दस्य प्रयोगः तैत्तिरीयसंहितायामनेकशः प्रयुक्तो दृश्यते। वेदे कुत्रचित् द्वादश त्रयोदश वा मासाः संवत्सरे इत्यप्युल्लेखो समुपलभ्यते। सौरमासानां त्रयोदशसंख्याया असम्भवत्वादेते चान्द्रा एव मासाः सम्भवितुमर्हन्ति। तैत्तिरीयसंहितायामेतेषां मासानां नामान्यपि निर्दिष्टानि सन्ति -

**मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्च इषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चापयाम गृहीतोसि संसर्पोऽहस्पत्याय त्वा॥**[१]

संसर्पशब्देन मलमासः, अहंस्पतिशब्देन च क्षयमासो गृह्यते। आचार्यलोकमणि- दाहालेन ज्योतिषशास्त्रस्येतिहासे प्राग्वैदिककाले मासगणनाविषये कथितम् - 'मासस्तु तदा चान्द्र एव आसीत्। तद्गणना च चन्द्रमसः पूर्णत्वाधारेण, तस्य द्विपूर्णत्वाभ्यन्तरवर्ती काल एव मासः।[२]

**पक्षविचारः**

वेदेषु पूर्वापरपक्षयोर्विचारे कर्त्तव्ये तस्य पूर्णिमान्तामान्तभेदेन द्वैविध्यदर्शनात् पक्षेऽपि तद्द्वैविध्यं स्वतः सिद्ध्यति। अर्थात् मासस्यामान्तत्वे स्वीकृते प्रथमं शुक्लपक्षः पश्चाच्च कृष्णपक्षः एवं तस्य पूर्णिमान्तत्वे सति प्रथमं कृष्णपक्षः पश्चाच्च शुक्लपक्षः स्वीक्रियते। तथा चोक्तम् -

**पूर्वपक्षं देवाऽन्वसृज्यन्त। अपरपक्षमन्वसुराः। ततो देवा अभवन्। पराऽसुराः।**[३]

अर्थात् पूर्वपक्षे देवानां परपक्षे चासुराणामुत्पत्तिवात् देवानां ज्योऽसुराणाञ्च पराजयोऽभूत्। अत्र विचारेण स्पष्टमाभासते यद् देवानां पूर्वपक्षः शुक्लपक्षो विद्यतेऽसुराणां परपक्षश्च कृष्णपक्षः। तथा च वेदे -

**पूर्वपक्षाश्चितयः। अपरपक्षाः पुरीषम्।**[४]

अनेन प्रकारेण वेदे पूर्वपक्षः शुभः अपरपक्षश्चाशुभ इति प्रतिपादितम्।

**तिथिविचारः**

दिनाङ्कज्ञापनार्थं वैदिककाले पक्षयोर्दिनरात्रीणां पृथक्पृथङ्नामान्यासन्। तैत्तिरीयब्राह्मणस्य निम्नलिखितवाक्येषु शुक्लकृष्णपक्षयोः दिनरात्र्योः भिन्न-भिन्ननामानि पठितानि सन्ति -

१ तै. सं. १.४.१४

२ ज्योतिषशास्त्रस्येतिहासः - पृ. सं. २३७

३ तै. ब्रा. २.२.३.१

४ तै. ब्रा. ३.१०.४.१

**संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्।**
**सङ्कल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तम्।**
**श्रेयो वसीय आयत् सम्भूतं भूतम्।** [१]

इमानि शुक्लपक्षस्य पञ्चदशादिनानां नामधेयानि सन्ति। अधस्ताच्छुक्लपक्षस्य रात्रीणां नामधेयानि कथ्यन्ते -

**दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना।**
**अप्यायमाना प्यायमाना प्याया सूनृ तेरा।**
**आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी।** [२]

अधस्तानुवाके कृष्णपक्षस्य दिनानां नामानि सन्ति।

**प्रस्तुतं विष्टुतं संस्तुतं कल्याणं विश्वरूपम्।**
**शुक्रममृतं तेजस्वि तेजः समिद्धम्।**
**अरुणं भानुमन् मरीचिमदभितपत् तपस्वत्॥** [३]

कृष्णपक्षस्यस्य रात्रीणां नामानि निम्नलिखितक्रमेण विद्यन्ते।

**सुता सुन्वती प्रसुता सूयमानाऽभिषूयमाणा।**
**पीती प्रपा सम्पा तृप्तिस्तर्पयन्ती।**
**कान्ता काम्या कामजाताऽऽयुष्मती कामदुधा॥** [४]

एवं प्रकारेण वक्तुं शक्यते यत् कालज्ञापकस्य ज्योतिषशास्त्रस्य मूलं वैदिकवाङ्मयमेवास्ति। ज्योतिषं हि कालज्ञापकं शास्त्रं कालस्य च मूलं वेदाः।

**डॉ. सुरेशशर्मा**
ज्योतिषविभागः
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथकीर्तिपरिसरः
देवप्रयागः (उत्तराखण्डः)

१ तै. ब्रा. ३.१०.१.१
२ तै. ब्रा. ३.१०.१.१
३ तै. ब्रा. ३.१०.१.२
४ तै. ब्रा. ३.१०.१.३

**सहायकग्रन्थसूची -**

*तैत्तिरीयसंहिता,* सम्पा., टि.धर्माधिकारी, पुणे : वैदिकसंशोधनमण्डल, १९११।

*ऋग्वेदः,* सम्पा. रामगोविन्दशास्त्री, वाराणसी : चौखाम्बाविद्याभवन, २००७।

*तैत्तिरीयमहाब्राह्मणम्,* सम्पा.सत्यव्रतसामश्रमी, मैसुर : १९२१।

शास्त्री, नेमिचन्द. *भारतीय ज्योतिष,* नई दिल्ली : भारतीय ज्ञानपीठ, २००९।

प्रसाद, गोरख. *भारतीय ज्योतिष का इतिहास,* लखनऊ : उत्तरप्रदेश सरकार, १९३५।

अङ्क- ३४ वेदविद्या
जुलाई - दिसम्बर २०१९ ISSN-२२३०-८९६२
UGC 'CARE' list Sl.No. 97

# वैदिकवाङ्मये वास्तुविद्यासमीक्षा

**डॉ. अशोकथपलियालः**

न केवलं भारतीयसाहित्ये अपितु विश्वसाहित्येऽपि वैदिकसाहित्यं सर्वाधिकप्राचीनम् । तस्मिन् स्थापत्यसम्बन्धिनः विविधोल्लेखाः प्राप्यन्ते। अनेन ज्ञायते यत् भारतवर्षे अत्यन्तप्राचीनकालादेव भवननिर्माणस्य सम्यक् ज्ञानमासीत्। तत्र एतादृशाः समुल्लेखाः प्राप्यन्ते, यद्वास्तोः विविधाङ्गानि व्यनक्ति। विशेषतः ऋग्वेदे अथर्ववेदे च भवनविन्यासस्य यद्रूपं समुपलभ्यते तस्य परम्परा भारते अनवरतरूपेण प्रचलिता अस्ति। स्थापत्यवेदरूपे अथर्ववेदस्योपवेदत्वेन शास्त्रमिदं प्रसिद्धमस्ति। वेदास्तु वास्तुशास्त्रविषयकाः स्वतन्त्रग्रन्थाः न सन्त्यपितु तेषु तत्कालिकसामाजिक-राजनीतिक-धार्मिक-दार्शनिकादिविषयाणामुपरि विवेचनसमये प्रसङ्गवशादेव वास्तुविषयेऽपि यत्किञ्चित् वर्णनमुपलभ्यते तेनैव वैदिककालिकवास्तुशास्त्रस्य समृद्धज्ञानस्य परिचयः प्राप्यते।

वैदिककालादेव वास्तुपुरुषस्य अवधारणा दरीदृश्यते, यस्याराधनया गृहे सुखमागच्छति। अस्य देवस्य निर्माणादिकार्ये सम्बन्धः नास्ति परन्तु गृहस्य रक्षणाय पालनाय चास्य महत्त्वपूर्ण-भूमिका दरीदृश्यते। ऋग्वेदे ऋषिः वास्तोष्पतिं समाराधयन् कथयति यत् –

**वास्तोष्पते प्रति जानीह्यस्मान्त्स्ववेशो अनमीवो भवा नः ।**
**यत्त्वे महे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे॥**
**वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो।**
**अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व॥**
**वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या।**
**पाहि क्षेत्र उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः॥**[१]

एषु मन्त्रेषु रक्षार्थं, पालनाय, धनप्राप्त्यर्थं, सुखाप्तये, गृहकल्याणं च मुख्यरूपेण प्रार्थना अस्ति। अनेन प्रकारेण ऋग्वेदस्य अस्मिन् मन्त्रे कामना वर्तते यदस्माकं निवासस्थानं सर्वप्रकारेण सुरक्षितो भवेत्। तद्यथा -

**सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सदानवः।**[२]

---

१ ऋग्वेदः, ७.५४.१-३

२ ऋग्वेदः, ७.६६.०५

अपि च- **ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत्।**[१]

अर्थादस्माकं गृहं द्रोहकारिभ्यः निन्दकेभ्यः सुरक्षितं भूत्वा दीर्घकालपर्यन्तं सुस्थिरो भवेदिति। एवं प्रकारेण अश्विनीकुमाराभ्यां प्रार्थनास्ति यदस्माकं यशः छर्दिश्च स्थिरो भवेत्।[२] तत्रैवोल्लिखितमस्ति यदतिथि-उपासकौ धनधान्यपुत्रपौत्रादिभिः सुसम्पन्ने गृहे एव निवासाय इच्छतः।[३] अतः ऋग्वेदे सन्तति-यश-धन-धान्यादिभिः पूर्णगृहस्य कामना अस्ति। अनेन सिद्ध्यति यत् तस्मिन् काले मानवः पूर्णगृहसुखाय प्रयत्नशीलो भवति स्म। सुन्दरं समृद्धं विशालं सुरक्षितं च गृहं भवेदिति कामनायुक्तः मानवः प्रार्थयति यदहं तु मृण्मयगृहे न अपितु तव बृहत्परिमाणयुक्ते सहस्त्रद्वारयुते गृहे गन्तुकामोऽस्मि।[४] अनेन प्रकारेण तदा मृण्मयगृहतः विशालसहस्त्रद्वारयुक्तगृहस्य परिकल्पना दृश्यते। तस्मिन् काले त्वष्टृ-ऋभू प्रसिद्धवास्तुकारौ आस्ताम्।[५]

ऋग्वेदे वास्तुशब्दस्यार्थः निवासः गृहं वास्ति।[६] तत्र 'गृह' शब्दः मुख्यरूपेण निवासार्थे प्रयुक्तो दृश्यते। यथा -

**अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते।**
**यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत्॥**[७]

अपि च- **सोममिन्द्राबृहस्पती पिबतं दाशुषो गृहे। मादयेथां तदोकसा॥**[८]

**यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः ।**
**यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना।**[९]

अथर्ववेदे[१०] ब्राह्मणग्रन्थेषु[११] अपि अस्मिन्नेवार्थे शब्दोऽयं प्राप्यते। ऋग्वेदे गृहस्यार्थे वास्तु-शरण-शर्म-गय-वरुथ्य-सदन-दुरोणादीनां[१२] प्रायः त्रिंशच्छब्दानां प्रयोगः दरीदृश्यते।[१३] निरुक्ते

---

१ ऋग्वेदः ७.१६.०८

२ ऋग्वेदः ७.७४.५

३ ऋग्वेदः ७.६७.१०, ७.४०.५

४ ऋग्वेदः ७.१.११

५ ऋग्वेदः ७.८९.०१, ७.८८.५

६ ऋग्वेदः ८.१९.३६

७ ऋग्वेदः ३.५३.६

८ ऋग्वेदः ४.४९.६

९ ऋग्वेदः ८.१०.१

१० अथर्ववेदः ७.८३.१, १०.६.४

११ ऐतरेयब्राह्मणम् ८.२१

१२ ऋग्वेदः २.३.८, १.१५४.६, ६.१६.३३, १.१२१.२, ४.५३.६, ८.१०१.५, १०.११.९, ७.९२.३

१३ वास्तुशास्त्रविमर्श तृतीयपुष्प भूमिका पृ.११

द्वाविंशति-प्रकाराणां दम-गृह-गय-पस्त्या-सदन-सम-दुरोण-हर्म्य-शाल-अगारआयतनादिसंज्ञकानां गृहाणां वर्णनं प्राप्यते।[1] तत्र गयस्याभिप्रायः पूर्णगृहस्थस्य आवासयोग्यस्थानादासीत्। यथा -

**यः स्त्रीहितीषु पूर्व्यः यजग्मानासु कृष्टिषु। अरक्षद्दाशुषे गयम्।**[2]

एवमेव आवस्थशब्दः अतिथिगृहार्थं प्रयुक्तो दृश्यते।[3] विशालभवनं तु राजप्रासादः[4] सामान्य-गृहाद्विपुलं गृहं सदननाम्ना प्रसिद्धमासीत्।[5] अथर्ववेदे सुन्दरगृहाय सुवास्तु तथा च गृहाभावाय अवास्तु शब्दः प्राप्यते।[6] यजुर्वेदसंहितासु वास्तुशब्दस्य प्रयोगः यज्ञवास्तोः सन्दर्भे दरीदृश्यते, किन्तु सूत्रग्रन्थेषु सामान्यनिवासरूपे कौशिकगृह्यसूत्रे च वास्तोः तात्पर्यं मृतकसंस्कारस्थलरूपे प्राप्यते।[7] अथर्ववेदस्य शालासूक्ते[8] भवननिर्माणवर्णनं दृश्यते।

तत्र वैदिककाले गृहस्य प्रमुखभागाः द्वाराणि (आवागमनस्य मुख्यमार्गः), सदस् सभा वा (आस्थानमण्डपवत् पुरुषाणामुपवेशनकक्षः), पत्नीसदनं (अन्तःपुरः अथवा स्त्रीणां कक्षः), कोष्ठः (भण्डारगृहम्), अग्निशाला (यज्ञमण्डपम्), पशुशाला (अश्वमती गोमती शाला)[9], कोषगृहं[10] चासन्। शतपथब्राह्मणे गृहस्य विभिन्नकक्षाणां रोचकवर्णनं प्राप्यते।[11] तैत्तिरीयारण्यके **धनधानी**[12] शब्दस्य प्रयोगः प्राप्यते। यत्तु सम्भवतः कोषागारार्थं विशेषकक्षो भवति स्म। एवमेव अथर्ववेदे पत्नीनां सदनमिति उल्लिखितं वर्तते, येन गृहे स्त्रीणां कृते विशेषभवनस्य व्यवस्था दृश्यते।[13] त्रिवरुथगः[14] त्रिभुजशयानः[15] त्रिधातुशर्मन्[16] त्रिधातुशरणम्[17] वा संज्ञा त्रितलयुक्तभवनानामासीत्।

---

१ निघण्टु ३.४, निरुक्तम् ३.१३.९

२ ऋग्वेदः १.७४.२ एवमेव द्रष्टव्यं ५.१०.३, ५.४४.७ च; अथर्ववेदः ३.६.३, ६.८४.१

३ छान्दोग्योपनिषद् ४.१.१

४ बृहदारणोपनिषद् ४.३.३७

५ वाजसनेयिसंहिता १२.७९

६ अथर्ववेदः १२.७.७

७ उद्धृत वास्तुशास्त्रविमर्श तृतीयपुष्प सम्पादकीय पृ. x

८ अथर्ववेदः ३.१२, ९.३

९ अथर्ववेदः ३.१२.२ अपि च गोभ्यो अश्वेभ्यो नमो यच्छाशालां विजयते - अथर्ववेदः ९.३.१३

१० कोषे कोषाः समञ्जिताः - अथर्ववेदः २.३.२०

११ शतपथब्राह्मणम् ३.५.१.११

१२ (i) तैत्तिरीयारण्यकम् १०.६७; (ii) भारतीय वास्तुकला का इतिहास पृ. ४०

१३ ए स्टडी ऑन वास्तुविद्या-तारापद भट्टाचार्य उद्धृत भारतीय वास्तुकला का इतिहास पृ. ४०

१४ ऋग्वेदः ८.२०.२१

१५ अथर्ववेदः ८.९.२

१६ ऋग्वेदः ८.४०.१२

१७ अथर्ववेदः २०.८३.१, डॉ. पी.घोषालमहोदयमतानुसारेण शीतातपवर्षाभ्यः सुरक्षितं गृहमेव त्रिधातुशरणमस्ति - Li Festyle of Vedic People, Page ६०

सामान्यभवनेषु गृहस्य मुख्यतः त्रीणि अङ्गानि आसन् – गृहद्वारं सभा पत्नीसदनं च। तदा गृहसुरक्षार्थं गृहाणि आवरणितान्यपि भवन्ति स्म।[१] अथर्ववेदे एकस्मिन् स्थले गृहस्योपमा अलङ्कृतहस्तिन्या कृतास्ति।[२] हस्तिन्याः पृष्ठभागसदृशः वैदिकगृहाणाम् आच्छादन भवति स्म। गृहाणाम् आन्तरिकासु बाह्यासु च भित्तिकासु विविधप्रकारकाणामालेखनं भवति स्म। तत्र सुन्दरगृहस्य तुलना सुसज्जितवधुना सह कृतास्ति।[३] शोभार्थसर्वाणि वस्तूनि गृहे उपलब्धानि आसन्। यथा -

**पूर्णं नारी प्रभरकुम्भमेतत् घृतस्य धाराममृतं तेन सम्भृताम्... गृहानुप प्रसीदाम्यमृतेन सहाग्निना।**[४]

तस्मिन् काले भवनानां निर्माणे प्रायः काष्ठवंशादीनां प्रयोगो भवति स्म। यथाथर्ववेदे प्राप्यते -

**उपमितां प्रतिमितामथो परिमितामुत।**

**शालया विश्ववाराया बद्धानि विचृतामसि॥**[५]

तदा वंशः (बांस) - स्थूणम् (स्तम्भः) - उपमितम् (स्तम्भभेदः) - प्रतिमितम् (बीमम्) - परिमितः (कासबीमः) वंशशालाजालम् (खिडकी फेम) - रथूणराजः (सिरदल) प्रभृतयः गृहनिर्माणे मुख्याङ्गानि आसन्।[६] शतपथब्राह्मणे वर्णनमस्ति यत् तस्मिन्काले स्थूणराजः दक्षिणतः उत्तरं प्रति भवति स्म । तद्यथा -

**तस्मान्मनुष्या उदीचीनवंशमेव शालां वा विमितं वा।**[७]

छदिस्[८] (छत) इत्यस्य वर्णनं तत्रोपलभ्यते। तदा वंशान् परस्परं ग्रन्थित्वा गृहस्याच्छादनं भवति स्म।[९] यस्योपरि तृणघासादिकानां विषुवन्तस्य [१०] प्रयोगः अनुमीयते। एवमेव **अक्षु** [११] अर्थात् आच्छादनं, **'ग्रन्थींश्चकार ते दृढान्'**[१२] अर्थात् वंशानां दृढग्रन्थिविषये वर्णनं दरीदृश्यते। तदा गृहाणाम् आच्छादनं गजपृष्ठाकारे अनुमीयते।[१३] **अपस्थूण**शब्देन अनुमीयते यत् तस्मिन् काले यदा

---

१ उद्धृतभारतीयवास्तुकला का इतिहास पृ. ३९

२ अथर्ववेदः ९.३.१७

३ अथर्ववेदः ९.३.२४

४ अथर्ववेदः ३.२०.८-९

५ अथर्ववेदः ३.५.११

६ भारतीयवास्तुशास्त्र एक चिन्तन-वास्तुशास्त्रविमर्श प्रथम पुष्प पृ. १७

७ शतपथब्राह्मण ३.१.१७

८ ऋग्वेदः १०.८५.१०, अथर्ववेद ३.१२.३

९ वंशानां ते नहानानाम् - अथर्ववेद ९.३.४

१० अथर्ववेदः ९.३.८, उद्धृतं वास्तुशास्त्रविमर्शः प्रथम पुष्प पृ. १७

११ ऋग्वेदः १.१०८.५, अथर्ववेद ८.८.१८, उद्धृतं वास्तुशास्त्रविमर्शः प्रथम पुष्प पृ. १७

१२ अथर्ववेदः ९.३.३, उद्धृतं वास्तुशास्त्रविमर्शः प्रथम पुष्प पृ. १७

१३ अथर्ववेदः ९.३.२४, उद्धृतं वास्तुशास्त्रविमर्शः प्रथम पुष्प पृ. १७

कदा स्वर्णादिधातूनामपि प्रयोगः अलङ्करणाय दृढार्थं च भवति स्म।[१] तस्मिन् काले पलद-तृण-मुञ्ज-शर-कुशा-वीरणादिवस्तुप्रभेदानुसारेण गृहस्याच्छादनं भवति स्म।

वैदिकसभ्यता ग्रामप्रधानसभ्यतासीत्। अतः ग्रामशब्दः तत्र बहुषु स्थानेषु समुपलभ्यते। शतपथ-ब्राह्मणानुसारेण केचन ग्रामाः परस्परं सन्निकटे आसन्।[२] केचन ग्रामाः दूरवर्तिनः आसन् ये परस्परं मार्गेण सम्बद्धाः आसन्।[३] ग्रामे प्रायः शुद्धवायुजलादीनां कृते सुन्दरव्यवस्थासीत्। अतः ग्रामे गृहाणि विरलानि आसन्। तदा बहुजनसंख्यायुक्तग्रामाः महाग्रामनाम्ना प्रसिद्धाः आसन्।[४] हैवेलमहोदयस्य मतानुसारेण एते ग्रामाः आयताकाराः आसन् तथा तस्य परितः चतुर्दिक्षु एकमेकं द्वारमासीत्।[५] पर्सी ब्राउनमहोदस्य मतमस्ति यत् वैदिकग्रामान् परितः काष्ठस्य वेष्टनमासीत् तत्र वेष्टनस्य पुरतः एकमथवा अधिकानि तोरणानि द्वाराणि वा निर्मितानि भवन्ति स्म।[६]

तत्र ऋग्वैदिककाले पुरशब्दः मुख्यतः दुर्गस्य कृते प्रयुक्तो दृश्यते। अपि च प्राकारस्य कृतेऽपि अनुमीयते।[७] परवर्तिवैदिकसाहित्येऽपि शब्दोऽयं प्राचुर्येण दरीदृश्यते। तदा नगरस्य अर्थे प्रयुक्तोऽस्ति। **'पुर'** शब्दस्य प्रयोग: ऋग्वेदे बहुषु स्थलेषु प्राप्यते ।यथा -

**युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा[८]।**

ऋग्वेदे पुरोपरि आक्रमणं कृत्वा तेषां विनाशस्य वर्णनं प्राप्यते। प्रतीयते तस्मिन् काले पुराणां संख्या अधिकास्ति । सुगमतया तेषां रचना भवति स्म। प्रारम्भे मृत्तिकातः एतेषां निर्माणं भवति स्म।[९] इन्द्रस्य कृते पुरन्दरशब्दस्य प्रयोगः संस्कृतसाहित्ये लभ्यते। तेन पुराणां भेदनं कृतम्। यथा-

**अध्वर्यवो यः शतं शम्बरस्य पुरो विभेदाश्मनेव पूर्वीः॥**[१०]

तत्र पुराणाम् अश्म-आयसीभेदेन द्वौ प्रकारौ लभ्येते।[११] एतेषां कृते एकस्मिन् स्थले शारदीशब्दस्य प्रयोगः दृश्यते।[१२] सम्भवतः शरदृतौ बाह्याकमणेभ्यः ग्रामरक्षार्थमेतेषां प्रयोगो भवति स्म। तदा भित्तियुक्तपुराणामुल्लेखोऽपि दरीदृश्यते। यथा -

---

१ ऋग्वेदः ५.६२.८, उद्धृतं वास्तुशास्त्रविमर्शः प्रथम पुष्प पृ. १७

२ शतपथब्राह्मणम् १३.२.४.२

३ छान्दोग्योपनिषद् ८.६.२

४ वैदिक इण्डेक्स जिल्द १, पृ. २४४-४५; भारतीयवास्तुकला का इतिहास पृ. ३६

५ भारतीयवास्तुकला का इतिहास पृ. ३६

६ भारतीयवास्तुकला का इतिहास पृ. ३६

७ वैदिक इण्डेक्स जिल्द-१, पृ. ५३८-५३९; भारतीयवास्तुकला का इतिहास पृ. ३७

८ ऋग्वेदः १.५३.७, एवमेव द्रष्टव्यं १.१३१.१, १.१३१.४, १.१३२.४, १.१७४.२ इत्यादयः

९ दि वैदिक एज; भारतीयवास्तुकला का इतिहास पृ. ३७

१० ऋग्वेदः २.१४.६२

११ द्रष्टव्यम् ऋग्वेदः २.१४.६ एवं च २.२०.८

१२ ऋग्वेदः १.१७४.२

**शतभुजिभिस्तमभिनुतेरघात्पूर्वी रक्षता मरुतो यमावत।**[१]

अतः वैदिकपुराः मुख्यतः बाह्याकमणेभ्यः रक्षासाधनानि आसन्। ते प्रकारादिभ्यः सुरक्षिताः दृढमृत्तिकाप्राचीरेभ्यः युक्ताः भवन्ति स्म।[२]

वैदिककाले धार्मिकवस्तुनः प्रयोगः मुख्यरूपेण यज्ञवेदिकारूपे दृश्यते। इष्टिकानामनेक-नामानि तेषां प्रकार: प्रयोगः मापानि च तत्र समुपलभ्यन्ते। यजुर्वेदे[३] वास्तुशब्दानां प्रयोगः प्रायः यूप-स्तूप-आसन्दिका-पर्यङ्कादिनिर्माणप्रसङ्गे प्राप्यते। शतपथब्राह्मणे यज्ञादिप्रसङ्गे चिति-इष्टिकादि वर्णनं प्राप्यते।[४] यज्ञवेदिकानिर्माणे शुल्वसूत्राणां विशिष्टस्थानमस्ति। अत्र शुल्वशब्दस्यार्थः रज्जुः। रज्जुना एव वेदीनिर्माणस्य कार्याणि सम्पादितानि भवन्ति स्म। यज्ञवेदीनिर्माणे बौधायन-आपस्तम्ब-कात्यायन-शुल्वसूत्राणां तथा च भूमिचयन-भूशोधन-भूमिपूजनादिके शाङ्खायन-पारस्कर-आश्वलायन-गृह्यसूत्राणां महत्त्वमस्ति।[५] अनेन तत्कालिकवास्तुशास्त्रस्य स्थितिविषये ज्ञायते।

ऋग्वेदस्य मन्त्रेण ज्ञायते यत् तदा वेदिका प्रायः वर्गाकारा भवति स्म -

**चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते।**
**तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम्॥**[६]

अस्यामृचायां प्रयुक्तः 'सुपर्ण'शब्दः गरुडाकारवेदिकायाः (श्येनचितिः) प्राशस्त्यविषये सङ्केतयति। शतपथब्राह्मणे[७] वेदिकायाः वर्णनप्रसङ्गे कथितमस्ति यत् वेदिका पूर्वं प्रति त्रिविधवितस्तिमिता दीर्घा भवेत्। पश्चिमी प्रति तस्याः विस्तृतिरधिका तथा च मध्ये तस्याः आकारः सङ्कुचितो भवेत्। एवमेव चितीनामर्थात् अग्निप्रज्वलितयज्ञवेदिकानां निर्माणम् इष्टिकाभिः भवति स्म।[८] अनुमीयते सर्वप्रथममपक्वेष्टिकाभिः चितीनां निर्माण भवति स्म परन्तु शनैः शनैः पक्वेष्टिकाभिरपि वेदिकानां निर्माणं जातम्। शतपथब्राह्मणे यज्ञादिप्रसङ्गे चितिवर्णनम्[९], इष्टिकानिर्माणम्[१०] इष्टिकाप्रमाणानि प्रकाराश्च[११] विस्तरेण वर्णिताः सन्ति। तत्र स्कम्भयूपशब्दौ

---

१ ऋग्वेदः १.१६८.८ अपि च अधा मही न आयस्यनाधृष्टो नीपीतये। पूर्भवा शतभुजि। - ऋग्वेदः ७.१५.१४

२ वैदिक इण्डेक्स जिल्द १ पृ. ५३८-५३९, उदघृतं भारतीयवास्तुकला का इतिहास पृ. ३७

३ तै.सं. १.३.६.३, वाजसनेयीसंहिता ३.५, १९.४६, २०.१

४ द्रष्टव्यं शतपथबाह्मणम् ७.१.२०, ८.१.५, ६.१.२.२२-२३-२९

५ उद्धृत वास्तुशास्त्रविमर्श तृतीयपुष्प सम्पादकीय पृ. xi

६ ऋग्वेदः १०.११४.३

७ शतपथब्राह्मणम् १.२.५

८ शतपथब्राह्मणम् ८.१

९ शतपथब्राह्मणम् ७.१.२०, ८.१-५

१० शतपथब्राह्मणम् ६.१.२., २२, २३, २९ इत्यादि

११ शतपथब्राह्मणम् ८.७.२.१७

स्तम्भाय प्रयुक्तौ स्तः। ऋग्वेदस्य एकस्मिन् मन्त्रे इन्द्राय सर्वोच्चस्तम्भ-युक्तदेवः कथितः[1]। तत्रैव सहस्रस्तम्भयुक्तभवनस्य वर्णनं प्राप्यते -

**राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते।**[2]

यजुर्वेदे वास्तुप्रयोगः यज्ञपरकः। तत्र यूपनिर्माणं[3] स्तूपनिर्माणम्[4] आसन्दिकापर्यङ्कादि-निर्माणं[5] च विस्तरेण वर्णितमस्ति। कृष्णयजुर्वेदे कथितमस्ति यत् यूपस्य यद्भागः भूमेरन्तः भवति तत्तु पितृणां भवति। भूमेरुपरि मेखलापर्यन्तं मनुष्याणां, मेखला तु वनस्पतीनां, मेखलोर्ध्वं शीर्षस्याधोभागश्च सर्वदेवानां, शीर्षस्थानं इन्द्रस्य एवं शेषभागः साध्यानां भवति।[6] अनेन कारणेन स्तम्भानामुपरि पितृणां, मनुष्याणां, वनस्पतीनां, देवादीनां च चित्राङ्कनस्य प्रथा समुपन्ना जाता। तदारभ्य यूपस्य धार्मिकमहत्त्वं दरीदृश्यते। तस्यारोपणात्पूर्वमेव केषाञ्चित् मन्त्राणामुच्चारणं भवति स्म। एभिः मन्त्रैः यूपस्याकारादिविषये ज्ञायते। तस्य वनस्पतिसंज्ञा, यूपनिर्माणाय कस्यचित् पवित्र-वृक्षस्य काष्ठस्य प्रयोगो भवति स्म, इति संसूचयति। यूपस्य स्थापना अग्निवेदिकायाः (चितितः) पूर्वे भवति स्म।[7] ब्राह्मणग्रन्थेषु यूपानाम् उच्छ्रायादिविषये वर्णनं प्राप्यते। तत्र अष्टकोणीययूपस्योल्लेखः समुपलभ्यते। सम्भवतः एभिः स्तम्भैरेव अनन्तरमष्टकोणीयप्रस्तरस्तम्भानां विकासोऽभवत्।[8] ऋग्वेदे परवर्तिसाहित्येषु च यूपस्य विशेषप्रकारस्योल्लेखाः लभ्यन्ते। एषु यूपेषु बलिपशवः बद्धाः भवन्ति स्म।[9]

एतदतिरिक्तं तत्र श्मशानस्यापि उल्लेखो प्राप्यते।[10] अथर्ववेदे बहुषु स्थलेषु शब्दस्यास्य प्रयोगः लभ्यते।[11] श्मशानशब्दः तस्य समाधिस्थलस्य द्योतकः यस्याधोभागे मृतकस्य अस्थीनि स्थापितानि भवन्ति। शतपथब्राह्मणे शवान्नम् (शवस्य कृते अन्नम्) अथवा श्मशान्नम् (पितृणां भोजनम्) इत्यर्थे शब्दस्यास्य प्रयोगः कृतः[12]। यास्केन शवशयनार्थे अर्थात् मृतकस्य विश्रामस्थलार्थे श्मशानशब्दः

---

१ ऋग्वेदः १०.११.१५, उद्धृतं भारतीयवास्तुकला का इतिहास पृ. ४२

२ ऋग्वेदः २.४१.५

३ तैत्तिरीयसंहिता १.३.६.३

४ वाजसनेयीसंहिता ३५

५ वाजसनेयिसंहिता १९.८६, २०.१

६ कृष्णयजुर्वेदः ६.३.४, उद्धृतम् भारतीयवास्तुकला का इतिहास पृ. ४३

७ भारतीयवास्तुकला का इतिहास पृ. ४२

८ भारतीयवास्तुकला का इतिहास पृ. ४२

९ वैदिक इण्डेक्स जिल्द २, पृ. १९४; भारतीयवास्तुकला का इतिहास पृ. ४२

१० वैदिक इण्डेक्स जिल्द १ पृ. ३९७; भारतीयवास्तुकला का इतिहास पृ. ४३

११ अथर्ववेदः २.११.१७, ८.३३.६, १०.२३.१

१२ शतपथब्राह्मणम् १३.८.१.१

स्वीकृतः[1]। बेवर महोदयमतेन अश्मन् शयनम् इत्यनेन श्मशानशब्दोत्पत्तिः स्वीकृता[2]। शतपथब्राह्मणे श्मशाननिर्माणविषयकाः नियमाः कथिताः सन्ति[3]। वैदिकवाङ्मये रथ[4]-चिति[5] पशुसद्म[6] प्रभृतिरचनानामपि वर्णनं समुपलभ्यते। येषां निर्माणादिविधयः न केवलं प्राचीनवास्तु-शास्त्रस्य अपितु अर्वाचीनवास्तुकलायाः अपि मूलाधारे अवस्थिताः सन्ति।

**डॉ. अशोकथपलियालः**
सहायकाचार्यः वास्तुशास्त्रे
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः
नईदिल्ली

**सहायकग्रन्थसूची -**

*तैत्तिरीयसंहिता,* सम्पा., टि.धर्माधिकारी, पुणे : वैदिकसंशोधनमण्डल, १९११।

*निरुक्तम्,* सम्पा.मुकुन्दझा, वाराणसी : चौखाम्बासंस्कृतप्रतिष्ठान,२००५।

*शतपथब्रह्मणम्,* सम्पा.हरिस्वामी, दिल्ली : नागपब्लिशर्स, २००२।

*अथर्ववेदः* , सम्पा.दमोदरसातवलेकरः, वलसाड : स्वध्यायमण्डलः, १८६५।

*ऋग्वेदः,* सम्पा. रामगोविन्दशास्त्री, वाराणसी : चौखाम्बाविद्याभवन, २००७।

*ऐतरेयब्रह्मणम्,* सम्पा.सत्यव्रतसामश्रमी, कोलकाता : १८९५।

*शुक्लयजुर्वेद (माध्यन्दिनसंहिता),* सम्पा. रामकृष्णशास्त्री, वाराणसी : चौखम्बाविद्याभवन, २०१३।

त्रिपाठी, देवीप्रसादः. *वास्तुशास्त्रविमर्शः,* नईदिल्ली : श्री.ला.वा.शा. रा. सं.वि.वि, 2016।

वाजपेयी, कृष्णदत्त. *भारतीय वस्तुकला का इतिहास,* लखनऊ : हिन्दी समिति, 1972।

Bhattacharya, Tarapad. *A History on Bāstuvidyā,* Delhi : South Asia Books, 1986.

---

१ निरुक्तम् ३.५

२ उद्धृत भारतीयवास्तुकला का इतिहास पृ. ४३

३ शतपथब्राह्मणम् १३.८.१-४

४ ऋग्वेदः १.१२९.१

५ शतपथब्राह्मणम् ८.१

६ अथर्ववेदः ९.३.१३

अङ्क- ३४ वेदविद्या
जुलाई - दिसम्बर २०१९ ISSN-२२३०-८९६२
UGC 'CARE' list Sl.No. 97

# आधुनिककाले वेदविहितकर्मानुष्ठानस्य प्रासङ्गिकता

**विरूपाक्षकौण्डिन्यशर्मा**

**श्रीमद्वागीश लक्ष्मीश गौरीशाद्यखिलामरैः।**
**यः पूज्यते मदानित्यन्तं वन्दे द्विरदाननम्॥**

भो भोः वैदिककर्मानुष्ठानतत्पराः वरिवस्या पुरःस्सरं विद्वदभ्यर्थनं मदीयम्। आधुनिककाले-वेदविहितकर्मानुष्ठानम् अवश्यं कर्तव्यमेव। इत्येवं प्रतिपादयामि। तत्र धर्म-अर्थ-काममोक्षाणां सिद्धिः भवति। मणि-मन्त्र-औषधजाः सिद्धयः। इत्युक्तेपि। स्यमन्तकमणिः, चिन्तामणिः इत्यादयः दिव्यमणयः अद्य अन्तर्हिताः। शेषाः जपहोमादिभिः वैदिकमन्त्रैः सशक्तीकृत्य सिद्धिं प्राप्नुवन्ति।

अपरा औषधजा-सञ्जीविनी-विशल्यकरणी इत्यादयः दिव्याः अन्तर्हिताः। शेषाः अञ्जन-लेपनादयः रसविष-पाषाणादयः अपि पूर्वोक्तमणिवत् सिद्धिं यच्छन्ति।

तथा मन्त्रसिद्धिः विदितैव। सा श्रौत-स्मार्त-पुराण-मन्त्र-आगमः प्राप्यते। इदं सर्वं वेदविहितमेव। अत्र श्रौतस्मार्त कर्मानुष्ठाने-केचन संस्काराः आवश्यकाः। ते नैमित्तिकाः वार्षिकाः मासिकाः नित्याः। निषेकादि श्मशानान्ताः तेषां वैमन्त्रतः क्रियाः। एवं सति आधुनिककाले यावत् अधिकारः कर्तव्यमेव। इत्येव विशद्यते स्कान्देकलिधर्मोत्तरेः "विश्वेश्वर उवाच" भो विप्राः कलिकालोस्मिन् आस्तिक्यं बहुदुर्घटम्।

**जीवनं दुर्लभं नृणां धार्मिके पथि नान्यथा।**
**कलेराज्ञा हरेराज्ञा कलेरिष्टं मदीप्सितम्।**
**कलौत्वब्दसहस्राणि यावत्पञ्चगतानि च॥**
**धार्मिकः कष्टमाप्नोति पापिष्ठः सुखमेधते।**
**अद्याहंताधिके जाताः कलौ विंशतिवत्सराः॥**
**अनूचानुकुलं नष्टं वेदो नष्टश्च सत्पथः।**
**शिल्पानिसंप्रदश्यैव कुराजावञ्चयन्ति वः।**
**सर्वथा वैदिकी वृत्तिः भवताम् अद्य दुर्लभा।**
**तस्मात् कालोचितं वक्ष्येश्शृण्वन्तु अद्य मदीरितः।**
**कृषिकर्मापि वाणिज्यं विप्रः कुर्यात्तथापदि॥**

**तत्राप्युचितमार्गेण धान्यं धनमुपार्जयेत्।**
**भवन्तः तेनकुर्वन्तु षट् कर्माण्यपि शास्त्रतः।**
**यथावलं यथायोगः सर्वं वः सुगमं भवेत्।**

तथा **कुर्वन्तु बुधवारेषु व्रतं दारिद्र्यनाशम्।**
**आयुर्हिरण्यसूक्ताभ्यां आवहन्त्यादिभिस्तथा।**

तथा धनुशून्यस्य

**व्रतं मानसिकं प्रोक्तं धनधान्यप्रवर्धकं।**
**......... इति व्यासेनोक्तं। तस्मात् अद्यापि वेदोक्तानि षट् कर्माणि कर्तव्यान्येव ॥**

तथा **तान्येतानि प्रवीणैस्तु न हन्तव्यानिहेतुभिः। इति।**

तथा **पुराणं मानवो धर्मः सांगोवेदः चिकित्सितम्।**
**आज्ञा सिद्धानि चत्वारि न हन्तव्यानि हेतुभिः॥**

इति पारिजाते।

**तस्मात् वेदविहितकर्म कर्तव्यमेव।**

अपि च :- देवलवचनेन "यावत् वेदः प्रवर्तते" इत्यनेन संन्यासस्य, आधानस्य च उपजीव्यत्वात् वेदाध्ययनं, तदर्थं संस्काराः वेदविहितकर्मानुष्ठानं च अवश्यं भवति।

अपि च :- श्री विष्णुमहापुराणे षष्ठांशे

**यदा यदा सतां हानिः वेदमार्गानुसारिणाम् ।**
**यदा यदा न यज्ञानाम् ईश्वरः पुरुषोत्तमः ।**
**इज्येत पुरुषैः यज्ञः तदा ज्ञेयं कलेवरम् ।**
**न प्रीतिः वेदवाक्येषु पाषाण्डेषु यदा रतिः ।**
**कलेवृद्धिः तदा प्राज्ञैः अनुमेया विचक्षणैः ॥**

इति। इत्युक्तत्वात्

तस्मात् आधुनिककाले वेदविहितकर्मानुष्ठानं कलेः प्रावल्यरोधाय भवति।

अपि च तत्रैव अग्रे :- आधुनिककाले वेदविहितकर्मानुष्ठानम् अल्पप्रयासेन अतीव धर्मोत्कर्षाय भवतीति च प्रतिपादितम् :-

**यत्कृते दशभिः वर्षैः त्रेतायां हायनेन तत्।**
**द्वापरे तच्चमासेन ह्यहोरात्रेण तत्कलौ॥**

**तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः।**
**प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम्॥**

**ध्यायन् कृते यजन्यज्ञैः त्रेतायां द्वापरे अर्चयन्।**
**यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥**

**धमोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ।**
**अल्पायासेन धर्मज्ञाः तेन तुष्टोस्म्यहं कलेः॥**

**भक्ष्या भक्ष्येषु नास्यास्ति पेयापेयेषु वैयतः ।**
**नियमो मुनिशार्दूलाः तेनासौ साध्वितीरितः॥**

इत्यादिश्लोकैः प्रपञ्चितम्।

एवं विचार्य आधुनिककाले वेदविहितकर्मानुष्ठानम् अवश्यमेवेति प्रतिभाति। इति शम्॥

इत्थम् -

**विरूपाक्षकौण्डिन्यशर्मा**
साङ्गोपाङ्गऋग्वेदसलक्षणघनपाठी
दशग्रन्थी अभिनवाश्वलयानः

**सहायकग्रन्थसूची -**

मीमांसक, युधिष्ठिर. *श्रौतयज्ञमीमांसा,* हरियाणा : रामलालकपूरट्रस्ट, १९८७।

शर्मा, वेणीराम., *यज्ञमीमांसा,* दिल्ली : चौखाम्बाप्रकाश, १९९८।

शास्त्री, पट्टभिराम. *यज्ञतत्त्वप्रकाशः,* कोलकाता : मोतीलालपब्लिशर्स, १९८९।

चैवे, ब्रजविहारी. *संस्कृतवाङ्मय का बृहद इतिहास,* लखनऊ : उत्तरप्रदेशसंस्कृतसंस्थान, १९९६।

पाण्डे, चन्द गोविन्द. *वैदिक संस्कृति,* इलाहावाद : लोकभारतीप्रकाशनम्, २००१।

अङ्क- ३४
जुलाई - दिसम्बर २०१९

**वेदविद्या**
ISSN-२२३०-८९६२

# आधुनिकसामाजिकन्यायस्य अवधारणा : चिन्तनस्य दृष्टिः

**डॉ. अजयकुमारमिश्रः**

**सामाजिकन्यायस्यार्थः परिभाषा -**

मनुष्यः यदा अस्यां पृथिव्याम् अजीजन तदा तस्य सामाजिकविकासः तादृशः नासीत् यादृशः सम्प्रति दृश्यते। विकासक्रमानुसारेण अनुदिनं मनुष्याः विकासशीला अभवन्। ते जीवनं सहज-सरलरूपेण अरण्येषु नद्याः तटे समीपे वा यत्र पर्याप्तरूपेण जलं समिधा च प्राप्तं भवतिस्म तत्रैव व्यतितवन्तः। तदानीं परस्परं हिंसाद्वेषयोः भावना मन्ये न्यूना आसीत्। अन्यो अन्यं प्रीणातिस्म। सामाजिकन्यायस्य अवधारणा भारतीयसमाजे विस्तृता वर्तते। यस्यां सामाजिक-कल्याणम्, सामाजिकसमानत्वम्, आर्थिकसमानत्वं सांस्कृतिकसमानत्वं, सामाजिकस्वातन्त्र्यम्, राजनैतिक-न्यायस्य तत्त्वानि समाहितानि सन्ति। एतदतिरिक्तं परस्परं बन्धुत्वं समागच्छती। समदृष्टिः समभावेन च वयं पश्यामः। समानभावेन दण्डव्यवस्था भवेत्। यथा अपराधः तथा दण्डः भवेत्।

अधुना आधुनिकराजनीतिकसिद्धान्तेषु सामाजिकन्यायस्य स्थानं नवीनं प्रतिभाति। आधुनिक-राजनैतिकवैज्ञानिकाः वदन्ति यत् मनुष्येषु परस्परं सामाजिकार्थिकविभेदयोः यद् असमानत्वं वर्तते तस्योन्मूलनाय निष्फलो अभवदयं उदारवादीलोकतन्त्रः। अयं लोकतन्त्रः सर्वेषां स्वातन्त्र्ये सुनिश्चितः। परञ्च व्यवहारे अनुभूयते यद् सामाजिकविभेदः आर्थिकसंसाधनानामभावकारणात् वर्द्धते। सम्प्रति राजनीतिकलोकतन्त्रः अव्यवहारिकः प्रतिभाति। अयं लोकतन्त्रः सर्वेषां कृते न्यायसङ्गतसामाजिकव्यवस्थाकरणाय असफलोऽभवत्। यस्मात् कारणात् सामाजिकव्यवस्थायाम् असमानत्वं दृश्यते। अद्य समाजे अनाचारदुराचारभ्रष्टाचाराणां साम्राज्यं दृश्यते। अनुदिनं हिंसा वलात्कारो भवति। तस्य न्यायिकव्यवस्था काऽपि न दृश्यते। रक्षकाः घटनास्थलं गच्छन्ति तत्रत्यी चित्रं नयन्ति। तत्र पत्रकाराः अपि शीघ्रातिशीघ्रं गच्छन्ति। तेऽपि तत्रत्या चित्राणि चित्वा दूरदर्शने समाचारपत्रे च प्रयच्छन्ति। समाजे परस्परं जनाः वार्तालापं कुर्वन्ति यदस्याः घटनायाः आभ्यन्तरे अमुकव्यक्तेः हस्तः वर्तते। परञ्च तस्य किमपि न भवति। ये किमपि न कृतवन्तः ते दोषयुक्ताः भविन्त। रक्षकैः तेभ्यः एव दण्डविधानं क्रियते। ये मूलरूपेण अपराधिनः सन्ति ते सर्वे आपणेषु महानगरेषु च स्वतन्त्ररूपेण विचरन्ति। एतेभ्यः दण्डव्यवस्था न्यायव्यवस्था च सर्वकारस्य सन्निधौ न दृश्यते। ते एव सर्वकाराः। ते स्वबुद्धया संविधानसंरक्षणाय मीमांसां कुर्वन्ति। तर्हि केन प्रकारेण आस्मिन् समाजे न्यायव्यवस्था दण्डव्यवस्था च स्थास्यति। रक्षकाः एव समाजस्य भक्षकाः सन्ति। अस्य समाजस्य विकासः कथं भवितुमर्हति। सम्प्रति नारीणां असुरक्षा सर्वत्र दरीदृश्यते। अस्माकं शास्त्रेषु नारीणां स्थानं सर्वोपरि वर्तते। एभिः शास्त्रैः अनुमीयते यत् तत्कालिकसमाजे नारीणां

सर्वश्रेष्ठं स्थानमासीत्। नारी पुरुषस्य सहयोगिरूपेण वर्तते। सा भीषणे समरेऽपि सेनानीत्वम् अलञ्चकार। यथोच्यते – **संहोत्रं स्म पुरा नारी समनं वाव गच्छति।**[१] अधुनापि दृश्यते एव। मनुनाऽपि उच्यते –

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥**[२]

परञ्च अयं आधुनिकभोगवादिसमाजः स्वस्वार्थपूर्तये अनाचारेण सर्वं करोति। सम्प्रति ये अनाचारिणः सन्ति तेभ्यः मृत्युदण्डः भवेत्। ऋषयः स्त्री न अबला इति मन्यन्ते। सा दुर्जनं कामुकं धृष्टं च सुवीरेव शूरपत्नीव धर्षयति घातयति च।

**सामाजिकन्यायस्य आवश्यकता -**

कस्यापि देशस्य सामाजिकव्यवस्था तदा एव स्थातुं शक्नोति यदा सा न्यायाधारिता भवेत्। एतदपि आवश्यकं यद् तस्यां व्यवस्थायां कस्यापि मनुष्यस्य वर्गस्य वा विशेषाधिकारः न भवेत्। अस्याः आवश्यकतायाः चर्चा निम्नलिखितप्रकारैः कर्तुं शक्यते।

**१. समाजः असमानत्वेन ग्रस्तः-**

यत्र वैदिकऋषयः **'सङ्गच्छध्वं संवदध्वम्'** इत्यस्य उद्घोषं कुर्वन्ति स्म। तस्मिन्नेव समाजे असमानत्वं दृश्यते। इदं मानवसमाजस्य दुर्भाग्यमेव वर्तते। यत्र परस्परं सहयोगभावना वर्तते तथापि असमानत्वं दृश्यते। अनेन सामाजिकवैषम्येण सामाजिकान्यायः प्रादुर्भूतः। अस्मिन् समाजे अभावग्रस्ताः मनुष्याः स्वविकासप्रक्रियायाम् अनुगताः अभवन्। अस्यां स्थितौ विचारणीयः विषयः अयं वर्तते यत् शोषितसमाजस्य विकासाय समाजस्य राज्यस्य च या मूलधारा वर्तते तया साकं सम्बन्धः भवेत्। एतदर्थं सामाजिकन्यायस्य अवधारणा आवश्यकी वर्तते।

**२. सामाजिकविकासाय न्यायस्य आवश्यकता –**

सामाजिकविकासाय सामाजिकन्यायस्य आवश्यकता अनुभूयते। कथमिति चेत् ? यः वर्गः अपेक्षाकृतसामाजिकविकासस्य नीचैः सोपाने विद्यते। तस्य अन्यवर्गैः साकं समत्वं भवेत्।

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासित॥**[३]

अस्य भावस्य व्याख्या यजुर्वेदस्य ऋषिः अनेन प्रकारेण करोति। यथा -

१ अथर्व. वे. २०.१२६.१०

२ मनु. ३.५.६

३ ऋ.वे. १०.१९१.४

**यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विचिकित्सति॥**
**यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥**[१]

आत्मदर्शिनः ये सिन्त तेषां कृते कः शोकः कः मोहः। वैदिकऋषेः दृष्टिः उदात्तपरिपूर्णा वर्तते। आरक्षणस्य आवश्यकता तदानीं नासीत्। योग्यतानुसारेण कार्यव्यवस्था आसीत्। सर्वजाति-धर्मसमुदायानां कृते एक एव जलाशयः भोजनालयः चासीत् । यथोच्यते - **समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि।**[२] अन्यच्च **सग्धीश्च मे सपीतिश्चमे**[३] सामाजिकन्यायः ऋषीणां समतावादी धारणा आसीत्। समानत्वमेव सामाजिकन्यायस्य प्राणतत्वमिस्त। समाजोत्पन्नवैषम्यं शमनाय ये वञ्चिताः शोषिताः सन्ति तेभ्यः कृतेऽपि सुलभव्यवस्था भवेत् ।

**३. समाजस्य सदस्यरूपेण समानत्वम् -**

सामाजिकन्यायस्य अभिप्रायः अयं वर्तते यत् मनुष्येषु विभेदः न भवेत्। समेषां कृते समानरूपेण आत्मीयविकासस्य अवसरो भवेत्। अनेन प्रकारेण सर्वे नागिरकविधेः समक्षं समानत्वमवाप्स्यन्ति।

**सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।**
**अन्यो अन्यमभिहर्यत वत्सं जातिमवाघ्न्याः॥**[४]

**४. सामाजिकन्यायः समानत्वञ्च -**

सामाजिकन्यायः सम्पूर्णरूपेण एकः समतावादिनी अवधारणा वर्तते। व्यवहारिकदृष्ट्या समानत्वमेव सामाजिकन्यायस्य आधारोऽस्ति। सामाजिकन्यायः समानत्वञ्चेति उभयोर्मध्ये किञ्चित् पार्थक्यं दृश्यते। यथा – समानतायाः अभिप्रायः सर्वकारेण निर्धारितनियमानां समक्षं समानत्वं तथा तेषां संरक्षणं भवेत्। अस्य आशयः अयं वर्तते यत् केनापि साकं विभेदः न भवेत्। सर्वैः साकं समानव्यवहारः भवेत् ।

**५. सामाजिकन्यायस्य भेदाः -**

मूलरूपेण अस्य द्वौ भेदौ विद्येते। (क) नकारात्मकविभेदः (ख) सकारात्मकविभेदः।

१ यजु.वे. ४०.६-७

२ अथर्व वे. ३.३०.६

३ ऋ.वे. १८.९

४ अथर्व. वे.३.३०.१

**क) नकारात्मकविभेदाश्रितसामाजिकन्यायः -**

सामाजिकन्यायस्य नियमानां परिपालनाय यदा कदा सर्वकारः नकारात्मकविभेदम् आश्रयते। अस्य विभेदस्य उद्देश्यः नकारात्मको भवति। यथा विकसितसमुदायस्य कृते सर्वकारेण प्रदत्तं सौविध्यं निषिध्यते। तदेव सौविध्यं अन्येषां दलितसमुदायानां कृते प्रदाय सामाजिकसद्भावः स्थाप्यते। अनेन व्यवहारिकदृष्ट्या समानत्वमागच्छति।

**ख) सकारात्मकविभेदाश्रितसामाजिकन्यायः -**

अस्य मूलोद्देश्यं भवति ये समाजे शोषितसमुदायाः विद्यन्ते तेषां विकासाय संवर्धनाय च विशेषरूपेण अनुदानं प्रदाय सहाय्यं करणीयम्। येन सर्वेषु समानत्वं समागच्छेत्। अधुना सकारात्मकविभेदाश्रितसामाजिकन्यायः एव व्यवहारे प्रयोगदशायां च दृश्यते ।

सर्वेषु सह-अस्तित्वपरिपालनाय वैदिकऋषिः वदति -

**सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**[1]

अधुना सामाजिकन्यायस्य अभावः दृश्यते। सर्वत्र अशिक्षा अशान्तिः कोलाहलो निर्धनत्वं चिकित्सायाः अभावः। चिकित्सालये चिकित्सकाः न विद्यन्ते। कार्याणामभावः एतेषां दोषाणां निवारणाय कोऽपि उपायः सर्वकारेण न क्रियते। सम्प्रति कुटीरोद्योगाः न दृश्यन्ते। कुटीरोद्योगेन लघूद्योगेन च दुर्बलानां निर्धनानां हीनानां च कृते वृत्तिव्यवस्था क्रियते। ते उद्योगाः सम्प्रति विलुप्ताः। ये धनपशवः सन्ति तेषां हस्ते इदानीं सर्वं प्रदत्तं सर्वकारेण। ते स्वमनसा कर्मचारिणां नियोगं कुर्वन्ति। अधुना लोकतान्त्रिकसमाजे सर्वत्र भयाक्रान्ताः मानवाः दृश्यन्ते। कुत्रापि अभयस्य वातावरणं नास्ति यदि एतादृशी एव स्थितिः स्यात् तर्हि समाजे न्यायव्यवस्था केन प्रकारेण स्थास्यति। राष्ट्रियविकासाय अभयम् आवश्यकं वर्तते। यथोच्यते ऋषिणा -

**अभयं नः करन्त्यन्तरिक्षमभयं द्यावापृथिवी उभे इमे।**
**अभयं पश्चादभयं पुरस्तादुत्तराधरादभयं नोऽस्तु॥**
**अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः।**
**अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु ॥**[2]

अस्य समाजस्योत्थानं तदा एव सम्भाव्यते यदा समेषां वर्गाणां सन्तुलितविकासः भवेत्। यावत् पर्यन्तं बाह्याभ्यन्तरयोः शुद्धिः मनुष्याणां न भविष्यति तावत् पर्यन्तं सामाजिकन्यायव्यवस्था सम्यक् प्रकारेण न स्थास्यति। अतः वैदिकऋषिणा उच्यते –

१ ऋ.वे.१०.१९१.२

२ अथर्व वे. १९.१५.५-६

**वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्राँस्ते शुन्धामि॥**[1]

आचारतत्त्वैः मनस्थितदुर्भावनां संशोध्य समाजे न्यायव्यवस्था कर्तुं शक्यते।

**डॉ. अजयकुमारमिश्रः**

सहाचार्यः, संस्कृतविभागः

सिधो-कानहो वीरसा विश्वविद्यालयः, पुरूलिया (प.बं.)

**सहायकग्रन्थसूची -**

*अथर्ववेदः*, सम्पा. दमोदरसातवलेकरः, वलसाड : स्वध्यायमण्डलः, १८६५।

*ऋग्वेदः*, सम्पा. रामगोविन्दशास्त्री, वाराणसी : चौखाम्बाविद्याभवन, २००७।

*शुक्लयजुर्वेद (माध्यन्दिनसंहिता)*, सम्पा.रामकृष्णशास्त्री, वाराणसी : चौखम्बाविद्याभवन, २०१३।

पाण्डे, गोविन्द चन्द्र. *वैदिक संस्कृति,* इलाहावाद : लोकभारतीप्रकाशनम्, २००१।

*मनुसंहिता,* सम्पा. मानवेन्दुवन्दोपाध्यायः, कोलकाता : संस्कृतपुस्तकभाण्डार, २०१२।

दत्त, भगवत्. *वैदिकवाङ्मय का इतिहास,* सम्पा.सत्यश्रवा, दिल्ली : प्रणवप्रकाशन, १९९८।

उपाध्याय, बलदेव. *वैदिकसाहित्य और संस्कृति,* वाराणसी : शारदासंस्थानम् ,२०१०।

१ शुक्लयजु.वे. ६.१४

अङ्क- ३४ वेदविद्या
जुलाई - दिसम्बर २०१९ ISSN-२२३०-८९६२

# अथर्ववेदस्य पैप्पलादसंहिता - एकं विहङ्गावलोकनम्

**डॉ.सोमनाथदाशः**

[सारांशः – संस्कृतसाहित्यस्य सर्वप्राचीनपरम्परायाः मौलिकाः धर्मग्रन्थाः भवन्ति चत्वारो वेदाः। यथा – ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। एतेषां सर्वेषामपि वेदानां प्रयोगः अधुना कर्मकाण्डसन्दर्भेषु संस्कारेषु च यज्ञेषु च क्रियते। होता, अध्वर्युः, उद्गाता, ब्रह्मा इति चत्वारः ऋत्विजः यजमानाहूताः क्रमशः ऋग्यजुस्सामाथर्वणां प्रातिनिध्यं कृत्वा सर्वं कार्यं सम्पादयन्ति। एतेषु सर्वेष्वपि वेदेषु अथर्ववेदस्य आधुनिकसमाजे महद्वैशिष्ट्यं वर्तते। अस्य शौनकाद्याः नैकाः शाखाः प्राचीनकाले आसन्। किन्तु कालगर्भे ताः विलीनाः जाताः। अधुना अस्याथर्ववेदस्य शाखाद्वयमेव प्राप्यते। यथा - शौनकशाखा, पैप्पलादशाखा च। अनयोर्मध्येऽपि पैप्पलाद-शाखावलम्बिनः न्यूनसंख्याका एव भारतवर्षे सन्ति। अस्य प्रचारः प्रसारश्च अपेक्षते। प्रकृते शोधपत्रे अस्या एव पैप्पलादशाखायाः विषये विशेषचर्चा क्रियते। प्रामुख्येनात्र अथर्ववेदस्य महत्त्वम्, अस्य विविधशाखानां परिचयः, पिप्पलादमुनेः जीवनवृत्तान्तः, उत्कलेषु पैप्पलादशाखायाः पुनरुद्धारः, काश्मीरराज्ये पैप्पलादशाखायाः स्थितिः, पैप्पलादसंहितायाः प्रकाशिताः ग्रन्थाः, पैप्पलाद-संहितायाः विषयवस्तु इत्यादयो विषयाः चर्चितास्सन्ति।]

***[कूटशब्दाः (Key Words) – पैप्पलादसंहिता, अथर्वा, त्रयी, नव शाखा, जीवनवेदः, दधीचिः, राजतरङ्गिणी, कुञ्जविहारी उपाध्यायः, जोनराजः इत्यादिः]***

भारतवर्षस्य सर्वप्राचीनसंस्कृतेराधारस्तम्भाः अध्यात्मविद्याया ईश्वरतत्त्वस्य संस्कारानुष्ठान-विधीनां मूलसिद्धान्तसिद्धाः परब्रह्मणोऽनवद्यसृष्टिसम्भाराः प्रकृति-परिवेश-समाज-सभ्यता-शिक्षा-दीक्षा-तन्त्रमन्त्राणां निदर्शनभूतास्सर्वेषां शास्त्राणां साहित्यानाञ्च मूलस्रोतांसि भवन्ति चत्वारो धर्मग्रन्थाः ऋग्यजुस्सामाथर्वाख्याः ज्ञानविज्ञाननिधयो वेदाः। एतेषां सृष्टिविषये नैतावता कोऽपि प्रामाणिकं निर्णयं कर्त्तुं समर्थोऽस्ति। केचित्पौरुषेया अपरे चापौरुषेया इति विवदन्तस्सन्दिहानाः भ्रान्तिचक्रे नितरां भ्रमन्ति इति सुविदितोऽयं विषयः। मन्त्रद्रष्टृभिः ऋषिभिः प्रज्ञाचक्षुषा दृष्टाः वैदिकमन्त्राः कालक्रमेण गुरुशिष्यपरम्परया दर्शन-श्रवण-मनन-निदिध्यासनैः प्रचारिताः प्रसारिताश्च एकविंशशतकेऽस्मिन् नैकैः पाठभेदैः बहुभिः संस्थाभिः सम्पादिताः प्रकाशिताश्च सन्ति। एतेषु सर्वेष्वपि वेदेषु त्रयीति नाम्ना प्रथितेभ्यः ऋग्यजुस्सामाख्येभ्यः वेदेभ्यः भिन्नो गणित-विज्ञान-आयुर्वेद-समाजशास्त्र-कृषिविज्ञान-प्राणिविज्ञानादिभिः नैकैर्विषयैः समुपबृंहितो ब्रह्मज्ञानप्रदायको

विंशतिकाण्डैर्विभक्तोऽथर्ववेदः आधुनिकैहिकसुखसम्पत्तये किञ्चिद्वैशिष्ट्यं नूनमावहति। शान्तिकानि पौष्टिकानि च अपरिमितानि फलानि अथर्ववेदसन्दर्भैः परिपुष्टिं यान्तीति बहुभिः समालोचकैः सडिण्डिमनादः क्रियते। विष्णुपुराणे उच्यते – "पौरोहित्यं शान्तिकपौष्टिकादि-राज्ञामथर्ववेदेन कारयेद् ब्रह्मत्वञ्च" इति। ऐहिकफलभोगार्थमथर्ववेद एव सर्वातिशायि साधनमिति मार्कण्डेयपुराणे कथ्यते। तद्धि – "अभिषिक्तार्थमन्त्रैर्महीं भुङ्क्ते ससागराम्" इति। यस्मिन् राष्ट्रे शान्तिपारगाः अथर्ववेदाध्यायिनो भवन्ति तद्राष्ट्रं निरुपद्रवं नित्यं समृद्धिपथे अग्रे सरति इति अथर्वपरिशिष्टे प्रतिपाद्यते। अतः राजा दानसम्मानादिभिः जितेन्द्रियान् अथर्ववेदपारगान् नित्यं पूजयेत्। तदुच्यते-

**यस्य राज्ञो जनपदे अथर्वा शान्तिपारगः ।**
**निवसत्यपि तद्राष्ट्रं वर्धते निरुपद्रवम् ॥**
**तस्माद्राजा विशेषेण चाथर्वाणं जितेन्द्रियम् ।**
**दानसम्मानसत्कारैर्नित्यं समभिपूजयेत् ॥**[१]

अथर्ववेदस्सर्वेषु वेदेषु श्रेष्ठतमोऽस्ति, यत्र विविधतया जीवनोपयोगिनः विषयाः एकत्र समुपलभ्यन्ते। अत्र भैषज्यविद्या, आभिचारिकविद्या इत्यादयोऽपि प्राप्यन्ते। जीवनारम्भात् मरणं यावत् योग-भोग-मोक्षाणां चरमं साधनं वेदेऽस्मिन् वर्णितमस्ति। यदि ऋग्वेदः भाववेदः, यजुर्वेदः कर्मवेदः, सामवेदश्च गानवेद इत्युच्यते, तर्हि अथर्ववेदः जीवनवेद इति निरुच्यते। उच्यते च -

**"श्रेष्ठो हि वेदस्तपसोऽधिजातो ब्रह्मज्ञानं हृदये सम्बभूव"**

**"एतद्वै भूयिष्ठं ब्रह्म यद् भृग्वङ्गिरसः। योऽङ्गिरसः स रसः।**
**योऽथर्वाणस्तद्भेषजम्। यदमृतं तद् ब्रह्म।" इति।**

एवमथर्ववेदः सारभूतब्रह्मात्मकत्वात् ब्रह्मकर्तव्यसम्पादनात्मकत्वाच्च "ब्रह्मवेद" इत्यप्युच्यते। सोऽयं वेदः कल्पतरुतमः सर्वसिद्धिदोऽस्तीति अथर्ववेदपरिशिष्टे उच्यते। तद्धि -

**न तिथिर्न च नक्षत्रं न ग्रहो न च चन्द्रमा।**
**अथर्वमन्त्रसम्प्राप्त्या सर्वसिद्धिर्भविष्यति॥ इति।**

स्कन्देऽप्युच्यते -

**यस्तत्राथर्वणान् मन्त्रान् जपेच्छन्दस्समन्वितः।**
**तेषामर्थोद्भवं कृत्स्नं फलं प्राप्नोति स ध्रुवम्॥**

**अथर्वशब्दनिरुक्तिः**

यास्कप्रणीते निरुक्तग्रन्थे उच्यते – "अथर्वाणोऽथर्वन्तः। थर्वतिश्चरतिकर्मा, तत्प्रतिषेधः।"[२] अत्र थर्वधातुः गत्यर्थे प्रयुक्तः। अतः अथर्वन् इत्यस्यार्थो भवति - गतिहीनः, स्थिरो वा। यो वेदः

१ अ.वे.परि. ४/३२/३-४

स्थिरताविषये चित्तवृत्तिनिरोधविषये च योगोपदेशं ददाति सः वेदः "अथर्वन्" इति फलितार्थः । एवमेव गोपथब्राह्मणानुसारेण अथर्वशब्दः "अथार्वाक्" इति शब्दस्य संक्षिप्तरूप इति। अथ अर्वाक् इति अथर्वा। अर्थात् अथर्ववेदे आत्मसाक्षात्कारस्योपदेशः लभ्यते। शतपथब्राह्मणे अथर्ववेदः "प्राण" इत्युच्यते। अङ्गिरावंशजोऽथर्वामहर्षिः अस्य वेदस्य द्रष्टा इति हेतोः "अथर्ववेद" इति नामापि प्रसिध्यति। काशिकावृत्तौ थर्वधातुः हिंसार्थे प्रयुज्यते । थर्व-कौटिल्यहिंसायाम् इति धातोः निष्पन्नः नञर्थकोऽथर्वशब्दः अहिंसार्थं द्योतयति। एवमथर्ववेदोऽयं "ब्रह्मवेदः", "अमृतवेदः", "अङ्गिरोवेदः", "अङ्गिरसवेदः", "अथर्वाङ्गिरसवेदः", "भृग्वङ्गिरोवेदः", "क्षत्रवेदः", "भैषज्यवेदः", "छन्दोवेदः", "महीवेद" इत्यप्युच्यते।

**अथर्ववेदस्य शाखाः**

विविधवैशिष्ट्यसमन्वितस्याथर्ववेदस्य द्रष्टा कर्ता वा कोऽस्ति ? कथं वा विविधशाखाभिस्तस्य प्रसारो जातः ? इति महान् अयं प्रश्नः। अस्याथर्ववेदस्य सृष्टिविषये प्रसिद्धा एका कथाऽस्ति। एकदा सृष्टिं विधातुं ब्रह्मा तपश्चरणमकार्षीत्। तपश्चरणं कुर्वतस्तस्य रोमकुपेभ्यः स्वेदधारा प्रावहत्। तासु स्वेदधारासु रेतःस्रावोऽभवत्। तद्रेतःसहिता आपो द्विरूपा अभूवन्। तत्रैकतः स्थितं रेतो भृज्यमानं सद् भृगुर्नाम महर्षिर्बभूव। स एव भृगुः ब्रह्मणो दर्शनाय अथर्वाग् एनम् एतास्वेव अप्सु अन्वैच्छत् इति गोपथब्रह्मणे उच्यते। अशरीरया वाचा उक्तत्वात् अथर्वाऽभवत्। ततः अवशिष्टरेतोयुक्ताभिरद्भिः आवृत्तस्य वरुणशब्दस्य सर्वेभ्योऽङ्गेभ्यो रसोऽक्षरत्। सोऽङ्गरसभूतत्वात् अङ्गिरा नाम महर्षिरभवत्। ततः ब्रह्मा तमथर्वाणमहिरसं चाभ्यतपत्। एवं विंशतिसंख्यकाः अथर्वाणोऽङ्गिरसश्चोत्पन्नाः।

महाभाष्यस्य पस्पशाह्निके **"नवधा आथर्वणो वेदः"** इति महर्षिपतञ्जलिवचनात् अथर्ववेदस्य प्रधानाः नवशाखाः आसन् इति ज्ञायते। ताः शाखाः यथा – पैप्पलादः, दान्तः, प्रदान्तः, स्नातः, सौत्रः, ब्रह्मदावनः, शौनकः, देवदर्शिनी, चारणविद्या च। सायणभाष्य-प्रपञ्चहृदय-चरणव्यूह-स्रोतस्सु अथर्ववेदस्य शाखानां संख्या नवधा एव स्वीक्रियते। परन्तु नामसु भिन्नता दृश्यते। शौनकशाखा एव सर्वाधिकप्रचलिता प्रामाणिकी चाधुना सर्वैः समाद्रीयते। पुराणानुसारेण महर्षिवेदव्यासः सुमन्तुनामकं शिष्यम् अथर्ववेदम् अध्यापयामास इत्युच्यते। भागवतपुराणानुसारेण सुमन्तुः अभिचारप्रधानवेदस्य मुख्यप्रचारक आसीदित्युल्लिख्यते। तत्र सुमन्तोः द्वौ शिष्यौ आस्ताम् - पथ्यः, वेददर्शश्चेति। वेददर्शस्य शौल्कायनिः, ब्रह्मबलिः, मौदः, पिप्पलायनिः इति चत्वारः शिष्याः बभूवुः। पथ्यस्य च कुमुदः, शुनकः, ब्रह्मन्, जाजलिश्चेति चत्वारः शिष्या आसन्। एवमेव एतान् विहाय अङ्गिरसः, बभ्रुः, सैन्धवायनः, कश्यपः इत्यादयो महर्षयोऽपि अथर्वशाखाऽनुयायिनो भवन्तीति श्रीमद्भागवतपुराणे स्पष्टतया उल्लिख्यते । यथा -

२ निरुक्तम् - अ.११/सू.१८

**अथर्ववित्सुमन्तुश्च शिष्यमध्यापयत्स्वकाम्।**
**संहिता सोऽपि पथ्याय वेददर्शाय चोक्तवान्॥**
**शौक्लायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः।**
**वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु॥**
**कुमुदश्शुनको ब्रह्मञ्जाजलिश्चाप्यथर्ववित्।**
**बभ्रुश्शिष्योऽथाङ्गिरसः सैन्धवायन एव च॥**
**अधीयेतां संहिते द्वे सावर्णाद्यास्तथापरे।**
**नक्षत्रकल्पः शान्तिश्च कश्यपाङ्गिरसादयः।**
**एते आथर्वणाचार्याः ..................... ॥**[३]

विष्णुपुराणेऽपि अनयोः पथ्य-वेददर्शयोर्नाम उल्लिखितमस्ति। किन्तु तत्र वेददर्शस्थाने "देवदर्श" इति नाम प्राप्यते। उभयोर्मध्ये देवदर्श इति नाम एव प्रसिद्धमस्ति। यथोक्तं विष्णुपुराणे -

**शिष्यमध्यापयामास कबन्धं सोऽपि तं द्विधा।**
**कृत्वा तु देवदर्शाय तथा पथ्याय दत्तवान्॥**[४]

एवमेव तत्र मौद-ब्रह्मबलि-शौक्लायनि-पिप्पलाद-जाजलि-कुमुद-शौनक-बभ्रु-सुन्धवायन-मुञ्जि-केशादयः महर्षयः परम्पराक्रमेण उल्लिखिताः वर्तन्ते ।[५]

वायुपुराणाधारेण अथर्ववेदस्य शाखाः अधोलिखितप्रकारेण वर्णिताः । यथा -

**आथर्वणं द्विधा कृत्वा सुमन्तुरदद् द्विजाः ।**
**कबन्धय पुनः कृत्स्नं स च विद्याद्यथाक्रमात् ॥**
**कबन्धस्तु द्विधा कृत्वा पथ्ययैकं पुनर्ददौ।**
**द्वितीयं वेदस्पर्शाय स चतुर्द्धाऽकरोत्पुनः ॥**
**मौदो ब्रह्मबलश्चैव पिप्पलादस्तथैव च।**
**शौक्लायनिश्च धर्मज्ञश्चतुर्थस्तपनः स्मृतः ॥**
**वेदस्पर्शस्य चत्वारः शिष्यास्त्वेते दृढव्रताः।**
**पुनश्च त्रिविधं विद्धि पथ्यानां भेदमुत्तमम् ॥**
**जाजलिः कुमुदादिश्च तृतीयः शौनकः स्मृतः।**
**शौनकस्तु द्विधा कृत्वा ददावेकन्तु वभ्रवे॥**
**द्वितीयां संहितां धीमान्सैन्धवायनसंज्ञिने॥**[६]

३ श्रीमद्भा. - १२/७/१-५
४ वि.पु. ३/६/९
५ तत्रैव - ३/६/१०-१३
६ वा.पु.पूर्वार्धम् - ६१/४९-५३

अग्निपुराणानुसारेण -

**सुमन्तुर्जाजलिश्चैव श्लोकाय निरथर्वके।**
**शौनकः पिप्पलादश्च मुञ्जकेशादयोऽपरे॥**[७]

स्कन्दपुराणस्य नागरखण्डे अथर्ववेदस्य शतशाखानां नामान्युपलभ्यन्ते। यथा -

**अथर्ववेदो यश्चैष शतशाखो विनिर्मितः। इति ।**[८]

ब्रह्माण्डपुराणे उच्यते

**शौनकस्तु द्विधा कृत्वा ददावेकान्तु बभ्रवे।**
**द्वितीयां संहितां धीमान्सैन्धवायनसंज्ञिने॥**
**सैन्धवो मुञ्जकेश्यश्च भिन्नामाधाद् द्विधा पुनः।**
**नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः॥**[९]

मुण्डकोपनिषदि उच्यते यत् विश्वनियन्ता ब्रह्मविद्यारूपम् अथर्ववेदं सर्वादौ स्वज्येष्ठपुत्राय अथर्वाय दत्तवान् इति। चरणव्यूहोपनिषदनुसारेण पिप्पलादशाखाऽथर्ववेदस्य प्रथमशाखा इति प्रतिपाद्यते। गुह्यकाल्युपनिषदि तु "चतुर्थी शौनकी प्रोक्ता पञ्चमी पैप्पलादिका" इति वचनानुसारेण शौनकपैप्पलादशाखयोः स्थाननिर्धारणं क्रियते। एवमेव वारतन्तवी, मौञ्जायनी, तार्णवैन्दवी, सौमन्नवीति शाखानां नामानि अपि गुह्यकाल्युपनिषदि प्राप्यन्ते[१०]। मुक्तिकोपनिषदि अथर्ववेदस्य पञ्चाशद्भेदाः भवन्तीति निर्धार्यते। यथा – **"अथर्वणस्य शाखाः स्युः पञ्चाशद्भेदतो हरे"**[११] इति । सीतोपनिषदि अहिर्बुध्न्यसंहितायाञ्च अस्य पञ्चशाखाः प्रतिपादिताः । एवं प्रकारेण आप्राचीनकालात् अथर्ववेदस्य प्रचारे प्रसारे च तच्छाखागतशिष्याणां महती भूमिका अविद्यत। परम्पराक्रमेण कदाचित्तस्य लोपोऽप्यनुभूतः। अथर्ववेदस्य बहुलप्रचारः भारतदेशस्य उत्कलराज्ये तथा कश्मीरराज्ये अवलोक्यते। एतासु सर्वास्वपि शाखासु पैप्पलादशाखायाः ऐतिहासिकपृष्ठभूमिविषये किञ्चिदत्र पर्यालोच्यते।

**अथर्ववेदस्य पैप्पलादशाखा**

पिप्पलादमुनिसम्बन्धात् शाखाया अस्या नाम "पैप्पलादशाखा" इत्युच्यते। पिप्पलादमहर्षिः उपनिषत्कालिकः एको महान् ऋषिरासीत्, योऽसौ अथर्ववेदस्य सर्वप्रथमसङ्कलनकर्ता इत्युच्यते। पिप्पलफलं खादित्वा जीवितत्वादस्य नाम पिप्पलाद इति ख्यातमस्ति । प्रश्नोपनिषदः कथाऽऽधारेण

---

७ (अ.पु. २७१/८)

८ (स्क.पु.ना.ख.१७४/५०)

९ (ब्रह्माण्ड. अनुषङ्गपादे - ३५/६०-६१)

१० (उ.सं.गु.का.उ. - ५९/१-४)

११ (उ.सं.मुक्ति.उ. - १/श्लो.१३)

एकदा सुकेशा-भारद्वाज-प्रमुखाः षड्ऋषयः अध्यात्मविद्याविषयकसंशयनिवारणार्थं पिप्पलादमहर्षेः समीपे समाजग्मुः। पिप्पलादमहर्षिः तेषां सर्वेषामपि संशयानां निवारणं चकार। तेन दत्तानि सर्वाणि उत्तराणि प्रश्नोपनिषदि सुरक्षितानि वर्तन्ते। परमविदुषः ब्रह्मज्ञानिनः पिप्पलादस्य पित्रोर्विषये भिन्नानि मतानि प्राप्यन्ते। तत्र केचित् अयं दधीचि-प्रातिथेय्योः पुत्र इति, अपरे अस्य मातुर्नाम सुवर्चा अथवा सुभद्रा इति, अन्यत्र स्कन्दपुराणादिषु अयम् याज्ञवल्क्यस्य पुत्र इति इतरे अस्य मातुर्नाम गभस्तिनी इति विवदन्ति। किन्तु अयं दधीचेः पुत्र इति सर्वसम्मतं मतं प्रचलति। पिप्पलादमहर्षेः विषये नैकाः पौराणिकाः कथाः प्राप्यन्ते। ब्रह्मपुराणे अस्य महर्षेः कथा अतीव प्रसिद्धाऽस्ति।

पुरा दधीचिरिति नाम महर्षिः पवित्रगङ्गानद्याः दक्षिणप्रान्ते आश्रमं विधाय निवसति स्म। तस्य पत्नी लोपामुद्रा, लोपामुद्रायाश्च भगिनी गभस्तिनी तदाश्रममधिवसति स्म। एकदा देवताः दानवान् युद्धे पराजित्य दधीच्याश्रममाजग्मुः। तत्र मुनेरातिथ्यं स्वीकृत्य स्वीयानि अस्त्राणि तत्रैव गोपनीयरूपेण संस्थाप्य प्रतिनिवृत्ताः। परन्तु लोपामुद्रा अनेन कार्येण असन्तुष्टाऽभुत्। शतं वर्षाणि व्यतीतानि। देवताः पुनस्तत्र प्रत्यागत्य स्वीयास्त्राणि न स्वीचक्रुः। अस्त्राणि जीर्णानि जातानि। तदा दधीचिः तेषु तेजः सुरक्षितं स्यादिति विचिन्त्य तानि स्वीकृत्य पवित्रजलेन प्राक्षालयत्। अनेन सर्वेषामस्त्राणां शक्तिः जले क्षीणा विलीना च जाता । दधीचिः एतद् दृष्ट्वा तज्जलमपीबत्। अन्ते देवतास्तत्रागत्य स्वीयास्त्राणि अपृच्छन्। तदा दधीचिः स्वप्राणत्यागपूर्वकं स्वास्थीनि समर्पयामास। तैरेवास्थिभिः इन्द्रस्य वज्रं निर्मितमभूत्। किन्तु लोपामुद्रा पतेः मृत्युना हतोत्साहा तस्य शवेन साकमात्माहूतिं दातुमियेष। तदा सा गर्भवती आसीत् । तत्क्षणमेव सा स्वगर्भविदारणं कृत्वा शिशुं बहिर्निष्कास्य पिप्पलवृक्षस्याधः संस्थाप्य च पतिव्रतधर्मानुसारेण दधीचेः शवदाहेन सह सतीत्वमवाप्नोत्। पशुपक्षिणः तस्याः पुत्रस्य रक्षणावेक्षणं चक्रुः। एवं पिप्पलादवृक्षस्याधस्ताद् उद्भूतोऽयं बालः पिप्पलादनाम्ना परिचितोऽभूत्। चन्द्रः सर्वेषां वृक्षाणां राजा भवति। अतः पिप्पलादवृक्षः शिशोः रक्षणार्थं चन्द्रात् अमृतं प्रार्थयामास। तस्मात् अमृतं सम्प्राप्य पिप्पलादः शक्तिशाली अभूत्।

शनिग्रहदेवतायै अयं दण्डं प्रादात् इत्यपि कथा प्रसिद्धाऽस्ति। स्वपित्रोः मृत्युकारणं शनिदेवताऽस्तीति मत्वा पिप्पलादः शनिमाकाशमार्गात् अधः निक्षिप्तवान्। द्वादशवर्षात् न्यूनायुस्सम्पन्नान् बालकान् न पीडयितुं शनिग्रहं निर्दिष्टवान्। श्रूयतेऽपि भारतीयसमाजे यत् विश्वामित्रस्य पितुः गाधेः, पिप्पलादस्य, कौशिकस्य च स्मरणेन शनिपीडा कदाऽपि न भवतीति देवानां सहयोगेन पिप्पलादः पितृभ्यां सह मेलनार्थं स्वर्गलोकमगमत्। प्रत्यावर्तनकाले गौतमस्य कन्यया सह तस्य विवाहोऽभवत्। महाभारतेऽसौ भीष्मशरशय्यासमीपे उपस्थित आसीदिति उच्यते।

अनेन महर्षिणा सङ्कलितोऽथर्ववेदः पैप्पलादशाखानाम्ना प्रसिद्धोऽस्ति । अधुना अथर्ववेदस्य द्वे शाखे समुपलभ्येते। यथा- पैप्पलादशाखा, शौनकशाखा च। पिप्पलादः सुमन्तोः शिष्य आसीत्। प्रपञ्चहृदयस्य कथनानुसारेण पिप्पलादशाखायाः मन्त्रसंहिता विंशतिकाण्डैर्विभक्ताऽस्ति तथा तस्याः ब्राह्मणेऽष्टाध्यायाः वर्तन्ते । पिप्पलादशाखायाः सम्पादितग्रन्थाः न्यूनसंख्यका एव भवन्ति। उत्कलप्रान्तस्य पुरीनिवासिश्रीकुञ्जविहारि-उपाध्यायमहोदयेन काञ्चीकामकोटिशङ्करमठानुकूल्येन २०१० तमे खीष्टाब्दे पैप्पलादशाखायाः संहिता महता परिश्रमेण सम्पादिता प्रकाशिता च । अस्य ग्रन्थस्य सम्पादनार्थं प्राप्तप्रेरणायाः विषये तेन प्रस्तावनाभागे विस्तृतं विवरणं प्रस्तुतमस्ति । तदाधारेण ज्ञायते यत् अथर्ववेदस्य पैप्पलादशाखायाः मौलिकसंहिता तालपत्रपोथिरूपेण आविष्कृत्य सर्वादौ पूर्वबङ्गप्रान्तस्य प्रसिद्धेन विदुषा श्रीमता दुर्गामोहनभट्टाचार्येण सम्पादनार्थं प्रयत्नः विहितः । किन्तु दुःखस्यायं विषयो यत् तस्याः काण्डचतुष्टयस्यैव सम्पादनं विधाय विद्वत्प्रवरोऽसौ दिवंगतः । परवर्तिकाले तस्य सुपुत्रेण श्रीमता दीपकभट्टाचार्येण अवशिष्टानां काण्डानां सम्पादनमकार्षीत् येन पैप्पलादसंहितेयं विश्वस्तरीयगवेषकाणां दृष्टिमाकर्षयामास । एतदपि ग्रन्थरत्नं साम्प्रतिकस्थितौ नैवोपलभ्यते ।

ततः परं १९७३ खीष्टाब्दस्य शेषार्द्धे काञ्चीकामकोटीपीठाधीश्वराः जगद्गुरुश्रीजयेन्द्र-सरस्वतीमहाभागाः यदा पदयात्रया समग्रस्योत्कलप्रान्तस्य परिक्रमामकार्षुस्तदा तत्र स्थितान् बहुसंख्यकान् पैप्पलादशाखाध्यायिब्राह्मणान् दृष्ट्वा तथा तेषामवस्थितिविषये विचारं विधाय पैप्पलादशाखायाः कृते एकां पाठशालां समारब्धवन्तः । एषा पाठशाला इदानीमपि तत्र निरवच्छिन्नतया प्रचलति । गुरुकरुणया पैप्पलादशाखायाः पुनरुद्धारः सञ्जातः । समग्रोत्कलदेशस्य ग्रामेषु निवसन्तः अथर्ववेदिब्राह्मणाः इदानीं सचेतनाः दृश्यन्ते । अधुनाऽपि उत्कलप्रदेशे महर्षिसान्दीपनीराष्ट्रियवेदविद्याप्रतिष्ठानानुकूल्येन नैकासु वेदपाठशालासु अथर्ववेदपैप्पलादशाखायाः अध्ययनम् अध्यापनं प्रचलति।

ततः परं २००७ तमे वर्षे ईश्वरस्य चलदवतारभूत-अवधूतदत्तपीठाधिपति-जगद्गुरुपरमपूज्य-श्रीश्रीगणपति-सच्चिदानन्दस्वामिजि-महोदयस्य प्रोत्साहनेन प्रकल्पितयोजनया च तदाश्रमनिवासिनः विशिष्टविदुषः वंशीकृष्णघनपाठिमहोदयस्य सहयोगेन श्रीअवधूतदत्तपीठे अखिलभारतवेद-सम्मेलनशुभावसरे प्रथमपञ्चदशकाण्डविशिष्टा अथर्ववेदस्य पैप्पलादशाखासंहिता पुनः प्रकाशिता ।

एवमेव हार्वार्डविश्वविद्यालयस्य प्रोफेसर् मैकेल् ह्विजील्, डा.कार्ल्सलोपेज; जुरिच् विश्वविद्यालयस्य प्रोफेसर् थोमास् जेण्डार्, डा.यासुके इकारी; लेइडेन्विश्वविद्यालस्य प्रोफेसर् वोडेविज्, डा.लुवास्कि, डा.अर्लो ग्रीफित्स इत्यादयः प्रमुखाः अथर्ववेदस्य पैप्पलादशाखायाः सम्पादने कृतभूरीपरिश्रमा आसन् ।

एवं श्रीकुञ्जविहारी उपाध्यायमहोदयः १९९८ खीष्टाब्दात्प्रारभ्य २००२ खीष्टाब्दं यावत् डा.ग्रीफित्समहोदयेन सह पाण्डुलिपिसंग्रहाभियानावसरे ओडिशाराज्यस्य दक्षिणसीमान्तर्वर्त्ति-

गञ्जाममण्डलतः उत्तरसीमान्तर्गतकेन्दुझर-मयूरभञ्जमण्डलं यावत् एवमेव दक्षिणपश्चिमसीमान्ते वर्तमानेषु नरसिंहपुर-वाङ्कि-बडम्बा-ग्रामेषु तथा बालेश्वर-भद्रख-केन्द्रापडाप्रभृतिषु उपकूलवर्त्तिषु प्रायशः षष्ट्यधिकेषु ग्रामेषु परिभ्रमणं कृत्वा तत्रत्यैः पैप्पलादशाखाकर्मकाण्डविद्भिः सह आलोचनामकरोत् । बहुमासव्यापिपरिभ्रमणहेतोः पैप्पलादसंहितायाः तालपत्रलेखैस्सह नैके कर्मकाण्डपाण्डुलिपयः, आङ्गिरसकल्पः, कर्मपञ्जिका, कर्मसमुच्चयः इत्याख्याः गुरुत्वपूर्णाः तालपत्रलेखाः तेन आविष्कृताः।

एतद्विहाय श्रीयुक्तोपाध्यायवर्यः १८७० तमे खीष्टाब्दे काश्मीरराज्यात् संगृहीतायाः शारदालिपिविशिष्ट-भूर्जपत्रपोथिकालिखितायाः पैप्पलादसंहिताया अनुसन्धानमपि अकरोत् । इयं तालपोथिका लेरोयकार् वेरट् महोदयेन सम्पादिताऽऽसीत् । अपि च परवर्त्तिकाले प्रोफेसर् डा.रघुवीरमहोदयेनापि सम्पादितैषा दिल्लीस्थितार्षसाहित्यप्रचारसंस्थाऽऽनुकूल्येन १९९० तमे खीष्टाब्दे प्रकाश्यमानीता । एतेषु सर्वेष्वपि प्रकाशितेषु ग्रन्थेषु पाठाशुद्धयः, स्वरयोजनाभावः दरीदृश्यन्ते । अतः एतच्छाखीयानां शिष्याणां पाठाभ्यासे महान् क्लेशः अनुभूयते । सन्दर्भेऽस्मिन् विचारविमर्शं कृत्वा सम्पादकः कुञ्जविहारी उपाध्यायः कठिनपरिश्रमेण मौलिकपाठस्य त्रुटिसंशोधनपूर्वकं ग्रन्थममुं सम्पाद्य २०१० खीष्टाब्दे फरवरीमासस्य २८ दिनाङ्के प्रकाशितवान् । एवं पैप्पलादसंहितायाः ये केचन अपरे ग्रन्थाः प्रकाशिताः ते यथा –

१) ग्रन्थस्य नाम – अथर्ववेदीयपैप्पलादसंहिता (प्रथमभागः)
सम्पादकः – दुर्गामोहनभट्टाचार्यः
प्रकाशकः – संस्कृत कालेज्, कालकाट्टा ; सम्पादनवर्षम् – १९६४

२) ग्रन्थस्य नाम – अथर्ववेदीयपैप्पलादसंहिता (द्वितीयभागः)
सम्पादकः – दुर्गामोहनभट्टाचार्यः
प्रकाशकः – संस्कृत कालेज्, कालकाट्टा ; सम्पादनवर्षम् – १९७४

३) ग्रन्थस्य नाम – अथर्ववेदीया पैप्पलादसंहिता
सम्पादकः/परिष्कारकः – वेदालङ्कारः आचार्यरघुवीरः
मुद्रकः - रवीन्द्रा अफसेट् प्रेस्, नारायण औद्योगिकक्षेत्रम्
सम्पादनवर्षम् – सृष्टिसंवत् १,९६,०।४३,०९१, विक्रमसंवत् : पौष, २०४७, जनवरी, १९९१

(अस्मिन् ग्रन्थे सर्वत्र पृष्ठेषु त्रयः कोष्ठाः कल्पिताः। तत्र प्रथमे टीप्पणम्। तत्र च संहिताब्राह्मणकल्पानां सदृशवचोनिर्देशभूयिष्ठम्। द्वितीयस्मिन् कोष्ठे यथाशक्यं परिष्कृता पैप्पलाद-संहिता प्रदत्ता। मन्त्रकाण्डानुवाकाः यत्र क्वचिदेव कोशे दृश्यन्ते। अध्येतॄणां सौकर्यं यथा भवेत् तथा एकैकशः मन्त्राः विभक्ताः संख्याश्च दत्ताः। तृतीयस्मिन् कोष्ठे कोशापपाठाः निवेशिताः। ग्रन्थस्य पश्चाद्भागे पैप्पलादशौनकशाखयोः तुलनात्मिका मन्त्रानुक्रमणिका एका सम्यङ्निवेशिताऽस्ति। अनया उभयोः शाखयोः समानासमानविवेचनं कर्तुं शक्यते।

४) ग्रन्थस्य नाम – अथर्ववेदीया पैप्पलादसंहिता (प्रथमो भागः) (१-१५ काण्डानि)
सम्पादकः – दीपकभट्टाचार्यः ; सम्पादनवर्षम् – १९९७
प्रकाशकः - The Asiatic Society, 1 Park Street, Kolkata

५) ग्रन्थस्य नाम – अथर्ववेदीया पैप्पलादसंहिता (द्वितीयो भागः) (षोडशकाण्डम्)
सम्पादकः – दीपकभट्टाचार्यः ; सम्पादनवर्षम् - February, 2008
प्रकाशकः – The Asiatic Society, 1 Park Street, Kolkata

६) ग्रन्थस्य नाम – अथर्वणवेदः पैप्पलादसंहिता
सम्पादकः – कुञ्जविहारी उपाध्यायः ; सम्पादनवर्षम् – २८ फरवरी २०१०
प्रकाशकः – काञ्चीकामकोटिशङ्करमठम्, निजिआप्रकाशनम्, पुरी

७) ग्रन्थस्य नाम – अथर्ववेदीया पैप्पलादसंहिता (तृतीयो भागः) (सप्तदशाष्टादशकाण्डे)
सम्पादकः – दीपकभट्टाचार्यः ; सम्पादनवर्षम् – २०११
प्रकाशकः – The Asiatic Society, 1 Park Street, Kolkata

दीपकभट्टाचार्यः दुर्गामोहनभट्टाचार्यस्य पुत्रो भवति । पितुः यदसम्पूर्णं कार्यमासीत् तत्तेन सम्पूर्णं कृतम् । अतः ग्रन्थारम्भे तेनोक्तं – "त्वदीयं वस्तु गोविन्द ! तुभ्यमेव समर्प्यते" इति ।

**काश्मीरराज्ये पैप्पलादशाखा**

भारतवर्षस्योत्कलेष्विव काश्मीरराज्येऽपि पैप्पलादशाखायाः बहुधा प्रचार आसीत् । अस्मिन् सन्दर्भे जोनराजप्रणीता राजतरङ्गिणी प्रमाणभूताऽस्ति । इतिहासानुसारेण १४११ खीष्टाब्दात्पूर्वं काश्मीरदेशस्येतिहासः अत्यन्तं सङ्घर्षपूर्णो दुर्विसहश्चासीत् । प्रायशः १३८९ खीष्टाब्दात् १३१४ खीष्टाब्दं यावत् तुर्कदेशस्य राज्ञः सिकन्दरस्य शासनसमये **सूहभट्ट** इति कश्चन काश्मीरयुवकः इस्लामधर्मेण दीक्षितः सन् सेनाध्यक्षपदव्यां नियुक्तोऽभवत् । परवर्त्तिनि काले स एव स्वीयनाम्नः परिवर्तनं कृत्वा मल्लिक-सैफ-उद्दीन् इति नाम्ना परिचितः जातः । अयमत्यन्तं कठिनो निष्ठुरश्च हिन्दुधर्मस्य विरोधं कृत्वा ब्राह्मणानां बहूपादेयग्रन्थानां विनाशमकरोत् । तेषु वेद-वेदाङ्ग-ज्योतिषादयः प्रधाना आसन् । न केवलमेतावता तात्कालिकपारम्परिकशिक्षानुष्ठानानामपि ध्वंसतां विधाय भारतीयानाम् आजन्ममृत्युपर्यन्तं परिपालितानां संस्काराणां निषेधविषयेऽपि दुःशकोद्घोषणं चकार । आबालवृद्धवनितास्तेन बहुधा पीडिताः । यथोक्तं राजतरङ्गिण्याम् -

**स्वयं ब्रह्मक्रियाद्वेषी म्लेच्छैश्च प्रतिबोधितः ।**
**सूहभट्टः प्रभुं जातु देवभङ्गार्थमैरयत् ॥**[१२]

१२ (द्वि.राज.त. – श्लो.७५०)

**जना(द्विजा)तिपीडया शास्त्रनिन्दया द्रोहचिन्तया ।**
**चिकित्सया च तस्याब्देर्यातं त्रिचतुरैस्तथा ॥**[१३] इति ।

१४१३ ख्रीष्टाब्देऽसौ तुर्कदेशस्य राज्ञः मृत्योरनन्तरम् अलिशाह इत्यभिधानस्य राज्ञः शासनकाले हिन्दुधर्मस्य विनाशे प्रधानभूमिकां निर्वहन् प्रधानमन्त्रिपदवीं प्राप्तवान् । १४१८ ख्रीष्टाब्दे जैन्-उल्-आबिदीन् इति नाम्ना राजा काश्मीरस्य सिंहासनमारुह्य देशस्य शान्तिप्रतिष्ठायै प्रायतत । तदानीं काश्मीरदेशे हिन्दुधर्मस्य मौलिकग्रन्थानां पुनरुद्धारोऽभवत् । तदुच्यते राजतरङ्गिण्याम् -

**दोषाकरेण सूहेन येषां सङ्कोचिता स्थितिः ।**
**व्यकासयत्ततो भास्वान् गुणिनस्तान् महीपतिः ॥**[१४]

**रन्ध्रैरधोगतिं प्राप्ता कुल्येवोद्धृत्य भूभुजा ।**
**विद्या प्रवाहिता तेन गुणिना गुणरागिणा ॥**[१५]

श्रीकुञ्जविहारि-उपाध्यायवर्येण उद्धृतात् अधोलिखितात् श्लोकादपि ज्ञायते यत् शिर्यभट्टेन काश्मीरे ब्राह्मणानां भारतीयशास्त्राणाञ्च पुनरुत्थानं विहितम् इति । यथा -

**नाशितं सूहभट्टेन यद्यत् काश्मीरमण्डले ।**
**योजितं शिर्यभट्टेन राजप्रार्थनयाऽथ तत् ॥**[१६]

शिर्यभट्टः जैन-उल-आबिदीनशासकस्य समकालिक आसीत् । अयमेव जोनराजाय राजतरङ्गिणीं लेखितुं प्रेरयामासेति ऐतिहासिकाः वदन्ति । जोनराजस्य राजतरङ्गिण्यामपि अस्य नामोल्लेखः प्राप्यते । एकदा राजा व्याधिग्रस्तोऽभूत् । तद्व्याधिनिराकरणं गरुडशास्त्रविशारदेन विषवैद्येन अनेनैव शिर्यभट्टेनाक्रियत । यथोक्तं द्वितीयराजतरङ्गिण्यां -

**स्वयं दत्ताभयो राज्ञा प्राप्तस्तमुदमूलयत् ।**
**शिर्यभट्टो विषस्फोटं करीव विषपादपम् ॥**[१७]

अयं धर्मवित् शीर्यभट्टः गुरुकुलं संस्थाप्य शिष्येभ्यः अन्नवस्त्राणि प्रदाय द्विजपुत्रान् अथर्ववेदं पाठयामास । अस्य सम्बन्धः कर्णाटैस्सह निरवच्छिन्नतयाऽऽसीत् । उच्यते च जोनराजकृत-राजतरङ्गिण्याम् -

**दत्तस्वकीयवस्त्रान्नश्शिर्यभट्टोऽथ धर्मवित् ।**
**तेनैवाथर्ववेदं तं द्विजपुत्रानपाठयत् ॥**

---

१३ (द्वि.राज.त. – श्लो. ८९०)
१४ (द्वि.राज.त. – श्लो. ९९५)
१५ (द्वि.राज.त. – श्लो. ९९६)
१६ (द्वि.राज.त. - श्लो.१०५१)
१७ (द्वि.राज.त.श्लो.१०४३)

**सा धर्मिष्ठा तु शालाऽस्य शिर्यभट्टस्य धीमतः।**
**कर्णाटानामपि परमागमत्स्पृहणीयताम्॥**[18]

महाभारते आचार्यः द्रोणः अथर्ववेदाश्रयणेन कुरुबलैस्सह रणं व्यधात्। तस्य मरणोपरान्तञ्च अथर्वा निराश्रयो जातः। ततः परम् अयं वेदः कर्णाटान् शरणीकृतवान् इति राजतरङ्गिण्यामुच्यते। यथा-

**त्रिपञ्चाङ्गमिते वर्षवृन्दे याते कलेः किल।**
**अथर्वकौशलाद् द्रोणो रणं कुरुबलैर्व्यधात्॥**
**कुरुभिर्निहते द्रोणे तदाथर्वा निराश्रयः।**
**शरणीकृतवान्वेदः कर्णाटान्पटुचेतनान्॥**[19]

श्रीकुञ्जविहारिमहोदयः सूहभट्टभयाकुलस्य युद्धभट्टस्य विषयेऽपि कांश्चन श्लोकान् उद्धृत्य लिखति यत् कश्मीरदेशे अथर्ववेदज्ञानप्राप्त्यर्थं तद्राज्यवास्तव्यानां चिरं मनोरथ आसीत्। यथोच्यते-

**शास्त्रेष्वथर्ववेदस्य माहात्म्यं परिपश्यताम् ।**
**काश्मीरिकानां तत्प्राप्त्यै चिरमासीन्मनोरथः ॥**[20]

समयानुरोधेन सूहभट्टपीडितः यजुर्वेदविद्विद्वान् युद्धभट्टः कश्मीरराज्यं त्यक्त्वा कर्णाटप्रदेशं प्रति गतवान् । तत्रत्यानां विदुषां सकाशात् अथर्ववेदमधीत्य पुनः श्रीजैनोल्लाबिदीनशासने स्वराज्यं समागत्य तद्वेदस्य प्रचारं प्रसारञ्च अकरोत् । तदुच्यते -

**कालेऽथ विपुले जाते सूहभट्टभयाकुलः।**
**युद्धभट्टाभिधो मानी देशान्तरमगात् गुणी ॥**
**यजुषः पठनात्प्रीतैः कर्णाटैस्सोऽथ पाठितः ।**
**सरहस्यमथर्वाणं निजां प्रत्यागतो भुवम् ॥**
**श्रीजैनोल्लाभदेनस्य गुणिनो गुणरागिणः ।**
**उपधीकृत्य तं वेदं परां तुष्टिमजीजनत् ॥**[21]

एवं प्रकारेण कश्मीरदेशेऽपि अथर्ववेदस्य प्रचारप्रसारसन्दर्भे उल्लेखः प्राप्यते। पञ्चदश-शताब्द्याः प्रारम्भकाले कर्णाटप्रदेशात् युद्धभट्टसङ्गृहीता ७८९९ मन्त्रसङ्कलात्मिका संहिता आंशिक-स्वरसङ्केतैस्सह प्राप्यते। अत्र प्रदत्तस्वरविधिः पैप्पलादशाखायाः प्रातिशाख्यानुसारेण अथवा शिक्षाशास्त्रानुसारेण वर्तते इति निर्णयः अतीव दुष्करो भवतीति श्रीकुञ्जविहारिमहोदयैः प्रतिपाद्यते।

---

१८ (तत्रैव - श्लो.१२७३-१२७४)

१९ (द्वि.राज.त.श्लो.१२६७-१२६८)

२० (द्वि.राज.त. – श्लो.१२६९)

२१ (तत्रैव - १२७०-१२७२)

**पैप्पलादसंहितायाः सामान्यपरिचयः**

साधारणतः अथर्ववेदस्य रचनाक्रमः द्विधा विभक्तोऽस्ति। यथा - काण्ड-सूक्त-मन्त्राः इति प्रथमः क्रमः। काण्डानुवाकप्रपाठक-सूक्तमन्त्राः इति द्वितीयक्रमः। सम्पूर्णे अथर्ववेदे विद्यमानेषु २० काण्डेषु मुख्यतः विषयत्रयं प्रतिपाद्यते। यथा - (१) भेषजविज्ञानम् अथवा रोगनिवारकौषधीनां प्रतिपादनम् (२) अमृतसिद्धिः अर्थात् मृत्युनिवारणसाधनप्रतिपादनम् (३) ब्रह्मज्ञानप्राप्त्युपायश्च। यथोक्तं गोपथब्राह्मणे – **"येऽथर्वाणस्तद्भेषजम् । यदमृतं तद्ब्रह्म ।"** इति । सायणाचार्यः अथर्ववेदस्य वर्ण्यविषयान् चतुर्दशभागेषु परिकल्पितवान् । कौशिकसूत्रानुसारेण अथर्ववेदस्य १४ वर्ण्यविषयाः भवन्ति। यथा - (१) यज्ञानुष्ठानं संस्काराश्च (२) पौष्टिककर्म (३) अनिष्टनिवारणं शान्तिकर्म च (४) समृद्धिः (५) राज्यव्यवस्था (६) अभ्युदयः अभीष्टसिद्धिश्च (७) शिक्षा (८) सामञ्जस्यमैक्यभावो वा (९) भैषज्यम् (१०) आभिचारिकप्रयोगः (११) स्त्रीकल्याणम् (१२) गृहसज्जा (१३) प्रायश्चित्तविधानम् (१४) भविष्यकथनम् इति। कालानुक्रमेण एते विषयाः परिशीलिता अन्ततो गत्वा २९ भागेषु विभक्ताः। पाकयज्ञ - मेधाजननप्रयोग - ब्रह्मचर्यसिद्धि - ग्रामनगरसंवर्द्धन -पुत्रकलत्रप्रज्ञापशुसमृद्धि - ऐक्यभाव - राजकर्म - शत्रुसादन - सङ्ग्रामविजय - शस्त्र - परिहरण - सैन्यस्तम्भन - सैन्यपरीक्षण - जय - पराजयविचार - सेनापत्यादिकर्म - सैन्यभेदनीति - राजस्थापन - प्रायश्चित्तकर्म - कृषिसंवर्द्धन - गृहस्थाभ्युदय - भैषज्यकर्म - संस्कार - सभाजयसाधन - वृष्टिप्रयोग - अभ्युदयकर्म - वाणिज्यकर्म - ऋणविमोचन - अभिचार - निवारण - आयुष्यकर्म - यज्ञानुष्ठानानि च प्रसिद्धानि प्रतिपाद्यानि तत्त्वानि भवन्ति। एतेषामुल्लेखः पण्डित-श्रीरामशर्माचार्येण सम्पादिताथर्ववेदग्रन्थे भूमिकाभागे उल्लिखितास्सन्ति।

कुञ्जबिहारिउपाध्यायैः सम्पादिते अथर्ववेदस्य पैप्पलादसंहिताग्रन्थे विद्यमान-काण्ड-अनुवाक-सूक्त-मन्त्रसंख्यासारणी यथा –

| काण्डम् | अनुवाकसंख्या | सूक्तसंख्या | मन्त्रसंख्या |
|---|---|---|---|
| प्रथमकाण्डम् | २२ | ११२ | ४८५ |
| द्वितीयकाण्डम् | १८ | ९१ | ४८३ |
| तृतीयकाण्डम् | ८ | ४० | २८२ |
| चतुर्थकाण्डम् | ८ | ४० | ३०२ |
| पञ्चमकाण्डम् | ८ | ४० | ३५३ |
| षष्ठकाण्डम् | ४ | २३ | २३७ |
| सप्तमकाण्डम् | ४ | २० | २११ |
| अष्टमकाण्डम् | ४ | २० | २१० |
| नवमकाण्डम् | ४ | २९ | ३०६ |
| दशमकाण्डम् | ३ | १६ | १४५ |

| | | | |
|---|---|---|---|
| एकादशकाण्डम् | ३ | १६ | १४५ |
| द्वादशकाण्डम् | २ | २२ | १९८ |
| त्रयोदशकाण्डम् | २ | ९ | ६५ |
| चतुर्दशकाण्डम् | ३ | ९ | ८४ |
| पञ्चदशकाण्डम् | ५ | २३ | २२७ |
| षोडशकाण्डम् | २० | १५५ | १३४६ |
| सप्तदशकाण्डम् | ८ | ५५ | ४१५ |
| अष्टादशकाण्डम् | १२ | ८२ | ४५६ |
| उनविंशकाण्डम् | १४ | ५६ | ९०५ |
| विंशकाण्डम् | १० | ६५ | ९१९ |
| योगः – | १६२ | ९२३ | ७७५९ |

इदानीं समुपलब्ध्योरथर्ववेदस्य द्वयोः शाखयोर्मध्ये पैप्पलादसंहिताशाखा सर्वप्राचीनेति विदुषामभिप्रायः । तत्र "शं नो देवीरभिष्टय आपो भवन्तु पीतये०" इति पैप्पलादसंहितायाः प्रथममन्त्रमाश्रित्य अस्य प्राथम्यमेवाङ्गीक्रियते । यतो हि भारतीयपरम्परायां पञ्चमहायज्ञेषु यदा ब्रह्मयज्ञस्यायोजनं क्रियते तदा सर्वादौ अस्यैव मन्त्रस्योच्चारणमक्रियत इति बौद्धायनगृह्यसूत्रे (२/९/५), भारद्वाजगृह्यसूत्रे (३/१५), वैखानसगृह्यसूत्रे (६/१७) च प्रमाणानि प्राप्यन्ते । नैकेऽपि विद्वांसः अनिरुद्धभट्ट-गुणविष्णु-रामनाथादयः मुक्तकण्ठेन अथर्ववेदस्य प्रथमो मन्त्रः "शं नो देवी०" इत्यादिरेव भवतीति उद्घोषयन्ति । अथर्ववेदस्य प्रथममन्त्रोऽयं पिप्पलाददृष्टः इति छान्दोग्योपनिषदि अपि प्रतिपाद्यते । यथा – **"अथर्ववेदादिमन्त्रोऽयं पिप्पलाददृष्टः"**[२२] ।

एवं चतुर्षु वेदेषु अथर्ववेदस्य महत्त्वपूर्णं स्थानं वर्तते । अस्य वेदस्य विषयवस्तु युगोपयोगि भवति । परन्तु इदानीं जनानामभिरुचिः वेदेषु प्रायः न दृश्यते । विशिष्टतया अथर्ववेदस्य शौनकसंहितायाः यथा प्रचारः प्रसारश्चास्ति तथैव पैप्पलादसंहितायाः प्रचारः नावलोक्यते । लुप्तप्रायायाः पैप्पलादशाखायाः पुनरुद्धारः विद्वद्भिः करणीय एव । अस्य संहिताग्रन्थस्य पुनः सस्वरपाठैस्सह सम्पादनमपेक्ष्यते । अत्र वैदिकाः विद्वांस एव समाश्रयणीयाः । इत्यलं पल्लवितेन ।

**डॉ. सोमनाथदाशः**

सहायकाचार्यः,

अनुसन्धानप्रकाशनविभागः

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

२२ (छा.म.भा. – संस्कृतसाहित्यपरिषत्, कोलकाता, पृ.११७)

**सहायकग्रन्थसूची -**

*अथर्ववेदसंहिता (शौनकीयः) (सायणभाष्यसहिता)* - सम्पा. - विश्वबन्धुः, विश्वेश्वरानन्दवैदिक-शोधसंस्थानम्, होशियारपुरः, पञ्जाबः ।

*निरुक्तम् (यास्काचार्यः)* - सम्पा. - आचार्य श्रीभगीरथशास्त्री, मेहरचन्द लछमनदास पब्लिकेशन्स, नवदेहली, संस्करणम् - २००९ ।

*महाभाष्यम् (पतञ्जलिः)* - सम्पा. डा.आत्मदेवमिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, प्रथमसंस्करणम् (२०१०) ।

*श्रीमद्भागवतमहापुराणम्* - सम्पा. - डा.ब्रह्मानन्द त्रिपाठी, चौखम्बा संस्कृत प्रतिष्ठान, देहली, संस्करणम् - २०१३ ।

*वैदिकवाङ्मयस्येतिहासः* - लेखकः - आचार्य जगदशीशचन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, संस्करणम् - २०१६ ।

*संस्कृतवाङ्मयम्* - प्रणेता - डा.हरिकृष्णशास्त्रिदातारः, कीर्त्तिसौरभप्रकाशनम्, वाराणसी, प्रथमसंस्करणम् (१९८९)

*संस्कृतवाङ्मयैतिह्ये वैदिकवाङ्मयम्* - प्रणेता - डा.अशोकचन्द्रगौडशास्त्री, नाग पब्लिशर्स, देहली, प्रथमसंस्करणम् (२००७) ।

*जोनराजप्रणीता राजतरङ्गिणी* (E-Book) – https//epustakalay.com/book/ 269972 -dwitiya-rajatarangini-by-jonaraja-prajya-bhatt/

*अथर्ववेदपरिशिष्टम्* - सम्पा. - जार्ज मेलवीलबोलिंग, चौखम्बा ओरियन्टालिया, दिल्ली, 110007

*विष्णुपुराणम्* - सम्पा. - डॉ.श्रद्धाशुक्ला, नागप्रकाशनम्, दिल्ली

*वायुपुराणम्* - अनुवादकः - रामप्रतापत्रिपाठी शास्त्री, हिन्दी साहित्यसम्मेलनं, प्रयागः, 12, सम्मेलनमार्गः, इलाहाबादः, 1987

*स्कन्दपुराणम्* – गीताप्रेस, गोरखपुरम्, जनवरी, 1951

*अथर्वणवेदः पैप्पलादसंहिता* - सम्पा. कुञ्जविहारी उपाध्यायः - काञ्चीकामकोटिशङ्करमठम्, निजिआप्रकाशनम्, पुरी, 2010

अङ्क- ३४ वेदविद्या
जुलाई - दिसम्बर २०१९ ISSN-२२३०-८९६२
UGC 'CARE' list Sl.No. 97

# प्राचीनभारतीयविद्याकेन्द्राणि, विश्वगुरुः भारतवर्षं च

**विरूपाक्ष वि. जड्डीपाल्**

अनादिनिधना नित्या वागुत्सृष्टा स्वयं भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः[१] ॥

इत्यनेन अस्य प्रपञ्चस्य सर्वाः प्रवृत्तयः वेदेभ्य एव इति भगवान् वेदव्यासः महाभारते निरदिशत्। मानवस्य ज्ञानस्य प्रवृत्तेश्च विकासः वेदात् एव अभवत् इति च भगवान् वेदव्यासः प्रोवाच। उपनिषद्वाङ्मये विद्या अविद्या चेति ज्ञनम् उपासना चेति प्रकारौ श्रुतिपथं नीतौ। तौ एव अद्यत्वेऽपि विद्यार्जनस्य, उपासनायाश्च मार्गौ प्रवर्तेते। उपनिषदि

विद्यां चाविद्यां च यस्तद्वेद उभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्यया अमृतमश्नुते[२]॥

इत्यनेन मन्त्रेण विद्यया अमरत्वप्राप्तिः, अविद्यया-लौकिककर्मोपासनया-जीवनभरणमिति उभयोः प्रकारयोः विद्याऽविद्ययोरावश्यकता प्रतिपादितैव, उपनिषदुपदेशः अद्यत्वेऽपि समाजे अनुभूतः एव फलैकदृष्टिभिर्मानवैः।

बृहदारण्यकोपनिषदि "अस्य महतो भूतस्य निःश्वसितम् एतत् यत् ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्वाङ्गिरसः, इतिहासः, पुराणं विद्या, उपनिषदः, श्लोकाः, सूत्राणि, अनुव्याख्यानानि, व्याख्यानानि, अस्यैव एतानि, निःश्वसितानि[३]" इत्यनेन ब्रह्मणो निःश्वसिताः सर्वा अपि विद्याव्यवस्था इत्येव उपदिश्यते।

मुण्डकोपनिषदि "द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति। अथ परा

---

१ महाभारतम्, शान्तिपर्व, २३२.५
२ ईशावास्योपनिषद्, ११
३ बृहदारण्यकोपनिषद्, २.४.१०, समानः पाठः ४.५.११ पुनः अत्र उपलभ्यते।

यया तदक्षरमधिगम्यते[१]" इति च वेदवेदाङ्ग विद्यानिर्देशो दृश्यते। मानवसंस्काराय विद्याव्यवस्था, न तु धनार्जनाय इति भारतीयविद्यामार्गोपदेशः।

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः[२] ॥

इत्यनेन श्लोकेन चरित्र्यशिक्षणे विद्याविधाने च भारतस्य, भारतीयानां चाग्रेसरत्वं जेगीयते मनुना महर्षिणा। विद्यानां पारदृश्वानो मनीषिणो हि मानवसंस्काराय बुद्धिवैशद्याय च चतुर्दशविद्यास्थानानां व्यवस्थामन्वकार्षुः। तानि चतुर्दश विद्यास्थानानि-

पुराणन्यायमीमांसाधर्मशास्त्राङ्गतिस्तराः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश[३] ॥ इति

मुण्डकोपनिषदि "तद्विज्ञानार्थं गुरुमेवाभिगच्छेत् श्रोत्रियं ब्रह्मनिष्ठम्[४]।" इत्यनेन गुरुकुल-प्रणाल्यां विद्यार्जननिर्देशो दृश्यते। तैत्तिरीयोपनिषदः शिक्षावल्ली विद्यार्जनसरणिं निर्दिशति, तद्यथा "अथाधिविद्यम्। आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्यासन्धिः। प्रवचनं सन्धानम्। इत्यधिविद्यम्[५]" इति।

छान्दोग्योपनिषदि नारदसनत्कुमारयोः संवादे नारदेन अधीतानां विविधविद्यानां समुल्लेखः दृश्यते, ते विषयाः भारतीयविद्यार्जने पाठ्यविषया आसन् इति ज्ञातुं शक्नुमः। "ऋग्वेदं भगवोऽध्येमि यजुर्वेदँ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यँ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजन-विद्यामेतद्भगवोऽध्येमि[६]"॥

अत्र चत्वारो वेदाः ऋग्यजुस्सामाथर्वनामानः, इतिहासः, पुराणानि, वेदानां वेदः, षड्सु वेदाङ्गेषु प्रधानं व्याकरणं, पितृश्राद्धकल्पः, गणितम्, दैवम्, निधिविद्या, वाकोवाक्यम्-तर्कविद्या, एकायनन्नीतिः राजनीतिः च, देवविद्या, ब्रह्मविद्या-वेदाङ्गविद्या, भूतविद्या (तत्त्वविद्या), क्षत्रविद्या, युद्धविज्ञानम्,

---

१ मुण्डकोपनिषद् 1.1.4-5
२ मनुस्मृति 2.20
३ याज्ञवल्क्यस्मृतिः, आचाराध्यायः – उपोद्घातप्रकरणम्, 1.3
४ मुण्डकोपनिषद् 1.2.12
५ तैत्तिरीयोपनिषद्, शिक्षावल्ली, अनुवाकसंख्या
६ छन्दोग्योपनिषत् 7.1.2

नक्षत्रविद्या-ज्यौतिषविद्या, खगोलविज्ञान, सर्पविद्या, देवविद्या, जनविद्या- विविधजनविद्या च सर्वा उल्लिखिताः सन्ति[१]। आधुनिककाले विद्याप्रपञ्चः सुविस्तृतः सूक्ष्मः अपि एतासु विद्याविधासु एव परिवर्तते।

इत्थं चरित्र्यशिक्षणे विद्याविधाने च भारतस्य, भारतीयानां चाग्रेसरत्वं चिरात् प्रवर्तते, तत्र विद्याग्रहणे गुरुकुलप्रणाली एव सर्वोत्कृष्टतया समादृता।

---

[१] term Veda also included the study of its six auxiliary sciences, the Science of correct pronunciation, Aphoristic literature guiding the performance of various rites and sacrifices, Grammar, Astronomy, Prosody and Etymology. The study of these auxiliary sciences had necessarily to precede the comprehension of the mcaningof the Vedas. .................................According to one source, the Silpas or crafts were as follows: Holy tradition and secular law, Sankhya, Nyaya ( Logic ), Vaiseshika ( Atomic theory of creation ), Arithmetic, Music, Medicine, four Vedas, Puranas ( Antiquities ), Iti- hasas ( History), Military Art, Poetry and Conveyancing. But this list includes the Vedasand many other subjects which cannot be termed aa crafts and seems to be very loosely given. A study of various references shows that the following crafts were taught in this university: Conveyancing or Law, Mathematics, Accountancy, Agriculture, Commercej Cattle breeding, Smithy, Carpentry, Medicine arid Surgery, Archery and allied Military arts. Astro? norriy, Astrology., Diviiiation, Ma^ic, Snake cl^afti^ring, Art of finding hidden treasures, Music, Dancing ' and Painting. It is obvious that the number eighteen need not be taken too literally. Universities in Ancient India, D G Apte, page no.12-13.
Along with instruction in the Buddhist doctrines Brahmanical sciences also used to be taught at this place. We find references to Brahmana students coming from the Gangetic plains to learn at this university. Over and above religious subjects, there was also instruction imparted in subjects like Niti ( Political science. Statesmanship), Varta (Business, Agriculture), Administration. Theology, Law, Economics and Accountancy. In some cases students, after studying at this university were employed by kings for assisting in the government of their kingdom, Universities in Ancient India, D G Apte, page no.44.

**प्राचीनभारतस्य गुरुकुलपरम्परा, ऋषिकुलपरम्परा च ।**

महर्षेः वाल्मीकेः तमसा-तीरस्थितः आश्रमः (वर्तमानः चित्रकूटप्रदेशः), महर्षेः पराशरस्य सरस्वती-तीरदेशे आश्रमः (वर्तमानः हरियाणा-पश्चिमराजस्थानप्रदेशः), महर्षेः व्यासस्य कृष्णद्वैपायनस्य बदरिकाश्रमः (वर्तमानः बद्रीनाथः) महर्षेः वसिष्ठस्य ब्रह्मर्षिदेशे सरस्वत्याः समीपे कुरुक्षेत्रे स्थितः आश्रमः (वर्तमानः कुरुक्षेत्रप्रदेशः) महर्षेः विश्वामित्रस्य कुशिकदेशे गङ्गातीरे स्थितः आश्रमः (वर्तमानः बक्सर-बलिया क्षेत्रम्-बिहार-उत्तरप्रदेशः), महर्षेः कण्वस्य मालिनी-नदीतीरे स्थितः आश्रमः (वर्तमानः कोटद्वारसमे उत्तराखण्डः) महर्षेः गौतमस्य गोदावरीतीरे ब्रह्मगिरौ स्थितः आश्रमः (वर्तमानः नासिकप्रदेशः) महर्षेः भारद्वाजस्य प्रयागसमीपे स्थितः आश्रमः (वर्तमानः प्रयागराजः) महर्षेः अत्रेः चित्रकूटपर्वतप्रदेशे आश्रमः (वर्तमानः चित्रकूटः) महर्षेः अगस्त्यस्य विन्ध्य-दक्षिणप्रदेशे स्थितः आश्रमः (वर्तमानः ताम्रपर्णीतीरः, तिरुनेल्वेली तमिलनाडु), महर्षेः पिप्पलादस्य पिप्पलवनस्थितः आश्रमः (बुन्देलखण्डप्रदेशः), महर्षेः गार्ग्यस्य मिथिलापरिसरस्थः आश्रमः (उत्तरबिहारः), महर्षेः ताण्ड्यस्य सामवेदीयाश्रमः (अधुना मध्यदेशः) महर्षेः शुकाश्रमः अधुना बदरिकाश्रमपरम्परा उत्तराखण्डे) आचार्यस्य सान्दीपनेः आश्रमः अवन्तिकायां (वर्तमानस्थानम् उज्जयिनी (उज्जैन), मध्यप्रदेशः), महर्षेः जैमिनेः नैमिषारण्ये स्थितः आश्रमः (वर्तमानः सीतापुरप्रदेशः, उत्तरप्रदेशः), महर्षेः पाणिनेः शालातुरग्रामे स्थितः आश्रमः (वर्तमानः लाहोरप्रदेशस्य समीपे प्राचीनः गान्धारदेशः), महर्षेः शाण्डिल्यस्य कौशिकी-तीरप्रदेशः, (वर्तमानः उत्तरबिहार–नेपालसीमा), महर्षेः उद्दालकस्य आरुणेः पाञ्चालदेशे स्थितं गुरुकुलं (वर्तमानकाले पश्चिमउत्तरप्रदेशे), महर्षे याज्ञवल्क्यस्य मिथिलाश्रमः (वर्तमानः विदेहप्रदेशः, उत्तरबिहार-नेपाल), महर्षेः कपिलस्य सागरतीरस्थः आश्रमः (वर्तमानः गङ्गासागरः, पश्चिमबङ्गालः) महर्षेः कश्यपस्य कश्मीरदेशे नीलमततीरे आश्रमः (वर्तमानः कश्मीरघाटी) महर्षेः दुर्वाससः नर्मदातीरे तपोवनम् (वर्तमानः मध्यप्रदेशः) महर्षेः नारदस्य सनत्कुमारस्य नैमिषारण्ये तथा बदरिकाश्रमे आश्रमः (वर्तमानः सीतापुर (उ.प्र.) तथा, बद्रीनाथः), महर्षेः शौनकस्य आश्रमः, नैमिषारण्याधिष्ठितः शौनकाश्रमः (वर्तमानपरिचयः : सीतापुरजनपदः, उत्तरप्रदेशः), महर्षेः अंगिरसः सरस्वती-दृषद्वती-मध्यदेशः (हरियाणा-राजस्थानसीमा), महर्षेः भृगोः भृगुक्षेत्रे आश्रमः, (सरस्वती-तीरम्, वर्तमानपरिचयः : भृगुकच्छः (भरुच), गुजरात), महर्षेः पुलस्त्यस्य आश्रमः गन्धमादनपर्वत-प्रदेशे वर्तमानकाले हिमालयप्रदेशे (उत्तराखण्ड-नेपाल) प्रान्तयोः, महर्षेः मार्कण्डेयस्य आश्रमः नर्मदा-तटस्थितः मार्कण्डेयाश्रमः (वर्तमानकाले अमरकण्टक-मध्यप्रदेशः), महर्षेः मतङ्गस्य आश्रमः ऋष्यमूकपर्वतसमीपे (वर्तमानकाले हम्पीप्रदेशः, कर्नाटके), महर्षेः देवलस्य आश्रमः उत्तरापथे

(वर्तमानकाले पंजाब-गान्धारयोः), महर्षेः अष्टावक्रस्य आश्रमः मिथिलाप्रान्ते (वर्तमानकाले उत्तरबिहार-नेपालयोः), महर्षेः ऋष्यश्रृङ्गस्य आश्रमः अङ्गदेशीयवनप्रदेशे (वर्तमानकाले भागलपुरक्षेत्रम्, बिहारः), आचार्यस्य मेधातिथेः आश्रमः सरस्वती-तीरदेशे, (वर्तमानकाले ब्रह्मावर्तक्षेत्रम्) इति प्राचीनकाले अनेकानि गुरुकुलानि ऋषिकुलानि चासन्। तेषु तेषु आबहोः प्राचीनकालात् दृढा विद्याव्यवस्था आसीत्।

**घटिकास्थानानि (घटिका) — प्राचीनभारतीयविद्याकेन्द्राणि**

घटिकास्थानानि घटिकाः वा प्राचीनभारते उच्चस्तरीयशिक्षायाः प्रतिष्ठिताः संस्थाः आसन्। एतेषां केन्द्राणां शिलालेखीयसन्दर्भैः सह संक्षिप्तं विवरणम् अत्र प्रस्तूयते। एतेषु मुख्यतया वेदाः, वेदाङ्गानि, दर्शनशास्त्राणि, मीमांसा, व्याकरणम्, तर्कशास्त्रं च अध्याप्यन्ते स्म। विशेषतः दक्षिण-भारते घटिकाः ब्राह्मणानां विदुषां च आवास-अध्ययन-अध्यापन-केन्द्ररूपेण विख्याताः आसन्।

